शासिष्यति॥अशासिष्यत्॥लिप्तूषादेर्ङः॥शासेरिः॥अशिषत्॥चकासृ दीप्तौ॥रुदत्॥च ३०
कास्ति॥चकास्तः॥चकासति॥चकास्यात्॥चकास्तु॥चकास्तात्॥चकास्तां॥चकासतु॥
धे सलोपो वा च्यः॥चकाधि॥अचकात्॥अचकास्तां॥अचकासुः॥अचकात्॥अचकाः॥का ४०
शादित्वादाम्॥चकासांचकार॥चकास्याता॥चकासिता॥चकासिष्यति॥अचकासिष्य
त्॥अचकासीत्॥इति परस्मैपदिनः॥प्रक्रिया॥अथात्मनेपदिनः॥चक्षिङ् व्यक्तायां वा
न चि

इकार उच्चारणार्थः॥ङकार आत्मनेपदार्थः॥स्कराद्योः स्थः॥ष्टुत्वं॥चष्टे॥चक्षाते॥आतोंतादतः
॥चक्षते॥चक्षे॥चक्षाथे॥चड्ढ्वे॥चक्षे॥चक्ष्वहे॥चक्ष्महे॥चक्षीत॥चष्टां॥अचष्ट॥अचक्षा
तां॥अचक्षत॥चक्षिङो न पि ख्याञ् णदौ वा वक्तव्यः॥चख्यौ॥चख्यतुः॥चख्युः॥चख्यौ॥च
या चक्षे॥ख्यायात्॥ख्येयात्॥ख्यासीष्ट॥ख्याता॥ख्याता॥ख्यास्यति॥ख्यास्यते॥अख्यास्यत्॥
अख्यास्यत॥अख्यत्॥अस्यतिख्याव च्यामात्मनेपदे से ङो वा वाच्यः॥ईडिषे॥ईडाथे॥ईडिध्वे॥
ईडे॥ईड्वहे॥ईड्महे॥ईडीत॥ ॥ईट्टां॥ऐट्ट॥ईडांचक्रे॥ईडिषीष्ट॥ईडिता॥ईडिष्य
ति॥ऐडिष्यत॥ऐडिष्ट॥ईश ऐश्वर्ये॥ईष्टे॥ईशिषे॥ईशीत॥ईष्टां॥ऐष्ट॥ईशांचक्रे॥
ईशिषीष्ट॥ईशिता॥ईशिष्यते॥ऐशिष्यत॥ऐशिष्ट॥आसृ उपवेशने॥आस्ते॥
आसीत॥आस्तां॥आस्त॥कासादित्वादाम्॥आसांचक्रे॥आसिषीष्ट॥॥
ईड स्तुतौ॥स्वसेच पाठसामान्यं॥ईड्डे॥ईडाते॥ईडते॥ईडीशोः सध्वोरिड्वक्तव्यः॥५॥

आसिता॥आसिष्यते॥आसिष्ट॥वस आच्छादने॥वस्ते॥वसीत॥वस्तां॥वसातां॥वसतां॥
अवस्त॥वसे॥वसिषीष्ट॥वसिता॥वसिष्यते॥अवसिष्यत॥अवसिष्ट॥षूङ् प्राणि
गर्भविमोचने॥सूते॥सुवीत॥सूतां॥सुवै पिगुणाभावो वाच्यः॥सुवै॥सुवावहै॥
सुवामहै॥असूत॥सुषुवे॥स्वरतीति वेट्॥सविषीष्ट॥सोषीष्ट॥सविता॥सेता॥सवि
ष्यते॥सोष्यते॥असविष्यत॥असोष्यत॥असविष्ट॥असोष्ट॥शीङ् स्वप्ने॥शीङः सार्व ३१
कगुणो भवत्यविविषये॥शेते॥शयाते॥शीङो अंतोरुट्॥शीङ् परस्यांत इत्येतस्य रु
डागमो भवति॥शेरते॥शयीत॥शेतां॥शयातां॥शेरतां॥अशेत॥अशेतां॥अशे या
रत॥शिश्ये॥शिश्याते॥शयिषीष्ट॥शयिता॥शयिष्यते॥अशयिष्यत॥अशयिष्ट
॥इङ् अध्ययने॥अधिपूर्वः॥अधीते॥अधीयाते॥अधीयीत॥अधीतां॥अधीयातां ४१
अधीयतां॥अध्यैत॥इयादेशे कृते पश्चाद्डागमः॥अध्यैयातां॥अध्यैयत॥इङो गा

दौगावव्यः॥अधिजगे॥अध्येषीष्ट॥अध्येता॥अध्येष्यते॥इङो वा गा सौ लृङि च तत्परस्य
प्रत्ययस्य ङित्त्वं वाच्यं॥अध्यगीष्यत॥अध्यैष्यत॥अध्यगीष्ट॥अध्यगीषातां॥अध्यगीष
त॥अध्यैष्ट॥अध्यैषातां॥अध्यैषत॥इत्यात्मनेपदिप्रक्रिया॥द्विष् अप्रीतौ॥अकारउ
भयपदार्थ॥द्वेष्टि॥द्विष्टे॥द्विष्यात्॥द्विषीत॥द्वेष्टु॥द्विष्टां॥अद्वेट्॥अद्विष्टां॥अद्विषुः॥अ
द्विषन्॥अद्विष्ट॥दिद्वेष॥दिद्विषे॥द्विष्यात्॥द्विक्षीष्ट॥द्वेष्टा॥द्वेक्ष्यति॥द्वेक्ष्यते॥अद्वेक्ष्य
त॥अद्वेक्ष्यत॥अद्विक्षत्॥अद्विक्षत॥टिलोपः॥अद्विक्षातां॥अद्विक्षत॥दुह प्रपूरणे
॥दादेर्घः॥तथोर्धः॥दोग्धि॥दुग्धे॥दुहंति॥धोक्षि॥दुग्धः॥दुग्ध॥दोह्मि॥दुह्वः॥
दुह्मः॥दुग्धे॥दुहाते॥दुहते॥दुह्यात्॥दुहीत॥हकारस्य कुत्वं चित्त्वमसांतुर भावो वाच्यः
॥दोग्धु॥दुग्धात्॥दुग्धां॥दुहंतु॥अधोक्॥अधोग॥अदुग्ध॥दुदोह॥दुदुहे॥दुह्यात
॥धुक्षीष्ट॥दोग्धा॥दोग्धा॥धोक्ष्यति॥धोक्ष्यते॥अधोक्ष्यत॥अधोक्ष्यत॥अधुक्षत॥

अधुक्षत॥ दिह उपचये॥ देग्धि॥ तद्वत्॥ लिह आस्वादने॥ लेढा॥ लेढि॥ लिढः॥ तद्वत्॥ ष्टु
ञ् स्तुतौ॥ आदेशः स्तः॥ स्तौति॥ स्तवीति॥ स्तुतः॥ स्तुवंति॥ स्तौषि॥ स्तवीषि॥ स्तुथः॥
स्तुते॥ स्तुयात्॥ स्तुवीत॥ स्तौतु॥ स्तुनात्॥ स्तुतां॥ स्तुवंतु॥ स्तुहि॥ स्तुतात्॥ स्तुतं॥ स्तु
त॥ अस्तवीत्॥ स्तौत्॥ अस्तुतां॥ अस्तुवन्॥ अस्तोः॥ अस्तवीः॥ अस्तुत॥ तुष्टाव॥ तुष्टुवतुः॥
तुष्टुवुः॥ तुष्टोथ॥ तष्टवथुः॥ तुष्टुव॥ तुष्टाव॥ तुष्टुव॥ तुष्टुम॥ तुष्टुवे॥ तुष्टुवाते॥ तुष्टुविरे॥
स्तूयात्॥ स्तोषीष्ट॥ स्तोता॥ स्तोता॥ स्तोष्यति॥ स्तोष्यते॥ अस्तोष्यत्॥ अस्तोष्यत॥ स्तुसुधू ३२
ञोः सेरिट्वा वक्तव्यः॥ अस्तावीत्॥ अस्तोष्ट॥ ब्रूञ् व्यक्तायां वाचि॥ ब्रुवादावीपिति॥ ब्रु
त्सिप्॥ ब्रुव ईकारप्रत्ययो भवति तकारहकारसकारमकारादौ पिति परे अबादौ विषये॥ ४२
ब्रवीति॥ ब्रूतः॥ ब्रुवंति॥ ब्रूते॥ ब्रुव आह पंचानां॥ ब्रुव उत्तरेषां तिबादीनां पंचानां ए
वद्यपं चादेशा भवंति॥ ब्रूव आह आदिशः॥ आह॥ आहतुः॥ आहुः॥ तथे॥ आहो हका
रस्य तकारो भवति थे परे॥ आत्थ॥ आहथुः॥ ब्रूथ॥ ब्रवीमि॥ ब्रूवः॥ ब्रूमः॥ ब्रूयात्॥ ब्रु
वीत॥ ब्रवीतु॥ ब्रूतात्॥ ब्रूतां॥ ब्रुवंतु॥ अब्रवीत्॥ अब्रूत॥ ब्रुवो वचिः॥ ब्रुवो वचिरादेशो
भवति अनपि विषये॥ इकार इत्॥ उवाच॥ ऊचे॥ अवोचत्॥ अवोचत॥ ॥ शेषं पूर्ववत्
॥ इति उभयपदिनः॥ लुग्विकरणादादयो धातवः समाप्ताः॥ श्रीनृसिंहो जयति॥ ॥ ॥
लुग्विकरणस्यापि जुहोत्यादिगणस्य विशेषः॥ हु दानादनयोः॥ ॥ ह्वादेर्द्विश्च॥ हु इ
त्यादेर्गणस्य लुग् भवति तस्मिन् सति धातोः द्विर्वचनं॥ कुहोश्चुः॥
गुणः॥ जुहोति॥ जुहुतः॥ ह्वे॥ द्विरुक्तादुत्तरस्यांतइत्यस्यादद्भवति॥ जुह्वति॥ जुहो
षि॥ जुहुथः॥ जुहुथ॥ जुहोमि॥ जुहुवः॥ जुहुमः॥ जुहुयात्॥ जुहोतु॥ जु
हुतात्॥ जुहुतां॥ जुह्वतु॥ हेर्धिः॥ जुहोतेरुत्तरस्य हेर्धिर्भवति॥ जुहुधि॥ अजुहो
त्॥ अजुहुतां॥ अन् उस्॥ द्विरुक्तादुत्तरस्य अन् उस् भवति॥ अजुहुसीत्युक्ते गुणः॥ अजु
हु

हवुः॥अजुहोः॥अजुहुतां॥अजुहुत॥अजुहवं॥अजुहुव॥अजुहुम॥जुहाव॥जु
हुवतुः॥जुहुवुः॥जुहविथ॥जुहोथ॥भीहुभृह्रीणांलुग्वद्विरुक्तानामाम्वा
वक्तव्यः॥जुहवांचकार॥ ऽ॥हूयात्॥होता॥होष्यति॥अहोष्यत्॥अहौषीत्॥अ
हौष्टां॥अहौषुः॥ञिभी भये॥बिभेति॥बिभीतः॥ह्रि॰ तिंहसेभिय इकारो वा वक्तव्यः॥बि
भितः॥बिभ्यति॥बिभीयात्॥बिभियात्॥बिभेतु॥बिभीतात्॥बिभितात्॥अबिभेत्॥अ
बिभीतां॥अबिभितां॥अबिभयुः॥बिभाय॥पक्षे आम्॥बिभयांचकार॥भीयात्॥ ३३
भेता॥भेष्यति॥अभेष्यत्॥अभैषीत्॥ह्रीलज्जायां॥जिह्रेति॥जिह्रीतः॥जिह्रियति॥जि
ह्रीयात्॥जिह्रेतु॥अजिह्रेत्॥अजिह्रीतां॥अजिह्रयुः॥जिह्राय॥जिह्रियतुः॥जि ४३
ह्रियुः॥जिह्रयांचकार॥ह्रीयात्॥ह्रेता॥ह्रेष्यति॥अह्रेष्यत्॥अह्रैषीत्॥पॄपालने
पूरनयोः॥ऋप्रोरिः पूर्वस्य॥ऋप्रोः पूर्वस्य इकारो भवति॥लुकि सति॥गुणः॥पिपर्ति॥पि

पृतः॥पवर्गादुत्तरस्य ऋकारस्य उर् भवति किति ङिति परे॥य्वोर्विहसे॥पिपूर्तः॥पिपुरति
॥पिपर्षि॥पिपूर्थः॥पिपूर्थ॥पिपर्मि॥पिपूर्वः॥पिपूर्मः॥पिपूर्यात्॥पिपर्तु॥पिपूर्तात्॥
पिपूर्तां॥पिपुरतु॥पिपूर्हि॥अपिपः॥ऋप्रोः हिस्योरिडागमो वा वक्तव्यः॥अपिपरत्॥अ
पिपूर्तां॥अपिपरुः॥अपिपः॥अपिपरः॥अपिपूर्तं॥अपिपूर्त॥अपिपरं॥अपिपूर्व॥अ
पिपूर्म॥पपार॥कित्वाभावात् गुणः॥पपरतुः॥पपरुः॥पपरिथ॥पूर्यात्॥इटो ग्रहां
परिता॥परीता॥परिष्यति॥परीष्यति॥अपरिष्यत्॥अपरीष्यत्॥अपारीत्॥लिङ्हि
तो न दीर्घः॥अपारिष्टां॥अपारिषुः॥डुस्वोपि॰ पिपर्तिरस्ति॥पिपर्ति॥पिपृतः॥पि
प्रति॥पिपृयात्॥पिपर्तु॥अपिपः॥अपिपरत्॥अपिपृतां॥अपिपरुः॥अपिपरः॥
अपिपः॥पपार॥पप्रतुः॥पारादेशोपि॥प्रियात्॥पर्ता॥परिष्यति॥अपरिष्यत्॥हन्ते
तःस्य पः॥अपार्षीत्॥ओहाक् त्यागे॥जहाति॥द्वित्वे सति लोपो नु वर्तते ईकारस्य॥
हा

क्ङिरुक्तेस्य धातोराकारस्य लोपो भवति ङिति स्वरे परे ईकारश्च ङिति हसे परे ॥ जहीतः ॥ ज
हातेराकारस्य क्ङिति हसे इर्वा वाच्यः ॥ जहितः ॥ जहति ॥ जहातेर्यादावालोपो वाच्यः ॥
जह्यात् ॥ जहातु ॥ जहीतात् ॥ जहितात् ॥ जहितां ॥ जहीतां ॥ जहतु ॥ ई र्वा हौ ॥ जहातेर्हौ
परे इकारः सिद्ध एव पक्षे आकार ईकारौ भवतः ॥ जहिहि ॥ जहीहि ॥ जहाहि ॥ अजहात् ॥ ३४
अजहीतां ॥ अजहुः ॥ जहौ ॥ जहतुः ॥ जहुः ॥ जहिथ ॥ जहाथ ॥ दृद्रिरे ॥ हेयात् ॥ हाता ॥ ४४
हास्यति ॥ अहास्यत् ॥ अहासीत् ॥ ऋ गतौ ॥ असवर्णे स्वरे इय् ॥ इयर्त्ति ॥ इयृतः ॥ इयृति ॥ इ
यृयात् ॥ इयर्त्तु ॥ इयृतात् ॥ इयृतां ॥ इयृतु ॥ इयृहि ॥ इयृतात् ॥ इयृतां ॥ इयृत ॥ इयराणि
इयराव ॥ इयराम ॥ ऐयः ॥ ऐयर्त् ॥ ऐयृतां ॥ ऐयरुः ॥ ऐयः ॥ ऐयरः ॥ ऐयृतं ॥ ऐयृत ॥ ऐयरं ॥ ऐयृ पृ
व ॥ ऐयृम ॥ आर ॥ आरतुः ॥ आरुः ॥ गुणोर्त्तिसंयोगाद्योः ॥ अर्यात् ॥ अर्त्ता ॥ अरिष्यति ॥ आरि

ष्यत् ॥ ऋदृशोऽङि गुणः ॥ आरत् ॥ पुषादित्वाद् ङः ॥ इति परस्मैपदिनः ॥ ॥ श्रीरामचंद्रो ज
यति ॥ ओ हाङ् गतौ ॥ द्वित्वं च श्लौ लुकि ॥ डुभृञ् धारणपोषणयोः ओहाङ् गतौ माङ्
माने इत्येतेषां पूर्वस्याकारस्य इकारो भवति ॥ लुकि सति ॥ हेर्लो ॥ जिहीते ॥ जिहाते ॥ जि
हते ॥ जिहीत ॥ जिहीतां ॥ जिहातां ॥ अजिहीत ॥ अजिहातां ॥ अजिहत ॥ अ ॥ जहे ॥ हासीष्ट ॥
हाता ॥ हास्यते ॥ अहास्यत ॥ अहास्त ॥ अहासातां ॥ अहासत ॥ माङ् माने ॥ मिमीते ॥ मिमा
ते ॥ मिमते ॥ मिमीत ॥ मिमीतां ॥ अमिमीत ॥ अमिमातां ॥ अमिमत ॥ अमिमीथाः ॥ ममे ॥ मासी
ष्ट ॥ माता ॥ मास्यते ॥ अमास्यत ॥ अमास्त ॥ इत्यात्मनेपदिनः ॥ ॥ डुभृञ् धारणपोषणयोः ॥
डु ञ इतौ ॥ बिभर्त्ति ॥ बिभृतः ॥ बिभ्रति ॥ बिभृते ॥ बिभृयात् ॥ बिभ्रीत ॥ बिभर्त्तु ॥ बिभृतात् ॥ बि
भृतां ॥ बिभ्रतु ॥ बिभृतां ॥ अबिभः ॥ अबिभृतां ॥ अबिभरुः ॥ अबिभृत ॥ बभार ॥ बभ्रतुः ॥ बभ्रुः
बभर्थ ॥ बभ्रे ॥ बिभरांचकार ॥ बिभरामास ॥ बिभरांबभूव ॥ यादादौ ॥ भ्रियात् ॥ भृषीष्ट ॥ भ

त्॥ भरिष्यति॥ अभरिष्यत्॥ अभरिष्यत॥ अभार्षीत्॥ अभृत॥ डुदाञ् दाने॥ ददाति॥ दादेः॥ द्वि
रुक्तयोर्दाधोराकारस्य लोपो भवति ङिति परे॥ दत्तः॥ ददति॥ दत्ते॥ ददाते॥ ददते॥ दद्यात्॥ ददीत॥
ददातु॥ दत्तात्॥ दत्तां॥ ददतु॥ दांहौ॥ दाधोराकारस्य एकारो भवति पूर्वस्य च लोपो भवति हौ
परे॥ देहि॥ दत्तं॥ दत्त॥ अददात्॥ अदत्तां॥ अददुः॥ अदत्त॥ ददौ॥ देयात्॥ दासीष्ट॥ दाता॥ दा
स्यति॥ दास्यते॥ अदास्यत्॥ अदास्यत॥ दादेवे॥ अदात्॥ अदातां॥ अदुः॥ दाधास्थामित्वं तु न ३५
गुणः॥ लोपो दुस्वाःऽसे॥ अदित॥ अदिषातां॥ अदिषत॥ अदिष्यः॥ डुधाञ् धारणपोषणयोः॥ ४५
दधाति॥ पूर्वस्य ङिति ऽसे धः॥ अभ्यांतस्य दधातेः पूर्वस्य दकारस्य धकारो भवति ङिति ऽसे परे॥
तथोर्द्धः इति सूत्रं दधातिविना॥ धत्तः॥ दधति॥ धत्ते॥ दध्यात्॥ दधीत॥ दधतु॥ धत्तात्॥ ध
त्तां॥ दधतु॥ धेहि॥ धत्तां॥ अदधात्॥ अधत्त॥ दधौ॥ धेयात्॥ धासीष्ट॥ धाता॥ धास्यति॥
धास्यते॥ अधास्यत्॥ अधास्यत॥ णिजिर् शौचपोषणयोः॥ इरित्॥ निजां गुणः॥ निजविजवि

षां पूर्वस्य गुणो भवति लुकि सति॥ नेनेक्ति॥ नेनिक्तः॥ नेनिजति॥ नेनेक्षि॥ नेनिक्थः॥ नेनि
क्थ॥ नेनेज्मि॥ नेनिज्वः॥ नेनिज्मः॥ निनिक्ते॥ नेनिज्यात्॥ नेनिजीत॥ नेनेक्तु॥ नेनि
क्तात्॥ द्वेः स्वरे पिनोपधाया गुणः॥ द्विरुक्तस्य धातोरपि विषये स्वरे उपधाया गुणो न भ
वति॥ निनिजानि॥ नेनिजाव॥ नेनिजाम॥ नेनिक्तां॥ अनेनेक्॥ अनेनेग्॥ अनेनिक्तां॥ अने
निजुः॥ निनेज॥ निनिजे॥ निज्यात्॥ सिस्योः॥ निक्षीष्ट॥ नेक्ता॥ नेक्ष्यति॥ नेक्ष्यते॥ अनेक्ष्य
त्॥ अनेक्ष्यत॥ अनिजत्॥ अनिजत॥ अनिक्त॥ नामिनोवतः॥ अनैक्षीत्॥ अनैक्तां॥ अनै
क्षुः॥ अनिक्तां॥ विजिर् पृथग्भावे॥ वेवेक्ति॥ नेनेक्तिवत्॥ विष्लृ व्याप्तौ॥ वेवेष्टि॥ वेविष्टः॥ वेवि
ष्यात्॥ वेविषीत॥ वेवेष्टु॥ वेविषाणि॥ अवेवेट्॥ अवेवेडु॥ विवेष॥ विष्यात्॥ विक्षीष्ट॥ वेष्टा॥ वेक्ष्य
ति॥ वेक्ष्यते॥ अवेक्ष्यत्॥ अवेक्ष्यत॥ लित्पुषाद्यङः॥ अविषत॥ ङ्वेति केचित्॥ हेषशांतात्
सकू॥ अविक्षत॥ इत्यलुग्विकरणह्वादयः॥ श्रीरामचंद्रो जयति॥ ॥अथ दिवादयः॥

दिवुक्रीडाविजिगीषाव्यवहारद्युतिस्तुतिमोदमदस्वप्नकांतिगतिषु॥ [illegible]॥ दिवादेर्यः
॥दिवादेर्गणात्‌ यप्रत्ययो भवति चतुर्षु परेषु॥ अपीपवादः॥ य्वोर्विहसे॥ दीव्यति॥ दीव्य
अ तु॥ दीव्यतु॥ अदीव्यत्॥ दिदेव॥ दिदिवतुः॥ दिदिवुः॥ दिदेविथ॥ दीव्यात्॥ देविता॥ दे
विष्यति॥ अदेविष्यत्॥ अदेवीत्॥ षिवु तंतुसंताने॥ सीव्यति॥ सिषेव॥ सीव्यात्॥ सेवि ३९
ता॥ सेविष्यति॥ असेविष्यत्॥ असेवीत्॥ नृती गात्रविक्षेपे॥ नृत्यति॥ ननर्त॥ ननृततुः॥
ननृतुः॥ नृत्यात्॥ नर्तिता॥ नर्तिष्यति॥ अनर्तिष्यत्॥ नृतृदृछृदकृतचृतां सीसस्यसेप ४९
रेऽिट्‌ वा वक्तव्यः॥ नर्त्स्यति॥ अनर्त्स्यत्॥ अनर्तीत्॥ जॄष्‌ वयोहानौ॥ ऋत इद्धातोः॥ जीर्य
ति॥ जीर्यते॥ जीर्यतु॥ अजीर्यत्॥ जजार॥ गुणः॥ जेजरतुः॥ जजरुः॥ जीर्यात्॥ जरि
ता॥ जरीता॥ जरिष्यति॥ अजरिष्यत्॥ अजरत्॥ अजारीत्॥ शो तनूकरणे॥ ओतः॥
यप्रत्यये परे धातोरोकारस्य लोपो भवति॥ श्यति॥ श्येत्॥ श्यतु॥ अश्यत्॥ शशौ॥

शायात्॥ शाता॥ शास्यति॥ अशास्यत्॥ वासिलोपः॥ अशात्॥ अशासीत्॥ छो छेदने
॥छ्यति॥ चच्छौ॥ छायात्॥ अच्छात्॥ अच्छासीत्॥ षो अंतकर्मणि॥ स्यति॥ ससौ॥ सेया
त्॥ साता॥ सास्यति॥ असास्यत्॥ असासीत्॥ दो अवखंडने॥ द्यति॥ ददौ॥ देयात्॥ अ
दात्॥ व्यध ताडने॥ ग्रहिज्येति च॥ विध्यति॥ विव्याध॥ विविधतुः॥ विविधुः॥ वि
व्य व्यधिथ॥ विव्यद्ध॥ विध्यात्॥ व्यद्धा॥ व्यत्स्यति॥ अव्यत्स्यत्॥ अव्यात्सीत्॥ पुष पु ष्य
ष्टौ॥ पुष्यति॥ पुष्येत्॥ पुष्यतु॥ अपुष्यत्॥ पुपोष॥ पुपुषतुः॥ पुपुषुः॥ पुष्यात्॥ पोष्टा
॥पोक्ष्यति॥ अपोक्ष्यत्॥ अपुषत्॥ श्लिष आलिंगने॥ श्लिष्यति॥ शिश्लेष॥ श्लिष्यात्॥
श्लेष्टा॥ श्लेक्ष्यति॥ अश्लेक्ष्यत्॥ हलसंतात्‌ क्सः॥ अश्लिक्षत्॥ श्लिषेरालिंगने सक्॥ ङ्गापवा
दः॥ अश्लिक्षत्‌ कन्यां चैत्रः॥ अनालिंगने॥ समश्लिषत्‌ जतु काष्ठं॥ तृप प्रीणने॥ तृप्यति॥ त
तर्प॥ तृप्यात्॥ तर्प्ता॥ तर्पिता॥ त्रप्ता॥ रारोऽऋसेदृशां॥ तर्प्स्यति॥ त्रप्स्यति॥ तर्पिष्यति॥

अतर्प्स्यत ॥ अतर्पिष्यत ॥ अत्रप्स्यत ॥ अतार्प्सीत् ॥ अत्राप्सीत् ॥ पुषादित्वात् ङः ॥ अ
तृपत् ॥ पक्षे ॥ रधादित्वादिट् ॥ अतर्पित् ॥ एवं दृप हर्षविमोचनयोः ॥ दृप हर्षगर्वयोः ॥
दृप्यति ॥ मुह वैचित्त्ये ॥ मुह्यति ॥ मुमोह ॥ मुह्यात् ॥ मोढा ॥ मोहिता ॥ रधादित्वात्
वेट् ॥ ता ॥ मोक्ष्यति ॥ मोहिष्यति ॥ अमोहिष्यत् ॥ पुषादित्वात् ङः ॥ अमुहत् ॥ नश अ
दर्शने ॥ नश्यति ॥ ननाश ॥ नेशतुः ॥ नेशुः ॥ नेशिथ ॥ ननंष्ठ ॥ नश्यात् ॥ मस्जिनशो ३७
र्झलि नुम् ॥ वक्तव्यः ॥ नंष्टा ॥ नशिता ॥ नंक्ष्यति ॥ नशिष्यति ॥ पुषादित्वात् ङः ॥ हेर्नशेरत ४१
एत्वं वा वाच्यं ॥ अनेशत् ॥ अनशत् ॥ शमु दमु उपशमे ॥ शमां दीर्घः ॥ शमादीनां दीर्घो
भवति श्ये परे ॥ अवादेशविषये ॥ शाम्यति ॥ शशाम ॥ शेमतुः ॥ शेमुः ॥ शम्यात् ॥ शमि
ता ॥ शमिष्यति ॥ अशमिष्यत् ॥ ऌदित्पुषादेर्ङः ॥ अशमत् ॥ शमु दमु श्रमु भ्रमु क्षमु क्लमु
मदु एते शमादयः ॥ रूपं च तद्वत् ॥ ञिमिदा स्नेहने ॥ आदितौ ॥ मिदेर्गुणो वक्त

व्यः ॥ मेद्यति ॥ मिमेद ॥ मिमिदतुः ॥ मिमिदुः ॥ मिद्यात् ॥ मेदिता ॥ मेदिष्यति ॥ अमेदि
ष्यत ॥ अमदत् ॥ असु क्षेपणे ॥ अस्यति ॥ आस ॥ आसतुः ॥ आसुः ॥ असिता ॥ असि
ष्यति ॥ आसिष्यत् ॥ अस्यतेस्थुक् वक्तव्यः ॥ आस्थत् ॥ इति परस्मैपदिनः ॥ अथा
त्मनेपदिप्रक्रिया ॥ ॥ जनी ङ् प्रादुर्भावे ॥ ईकार इत् ॥ ज्ञाजनोर्जा ॥ जनीप्रादुर्भावे ज्ञा
अवबोधने अनयोर्जादेशो भवति चतुर्षु परेषु ॥ जायते ॥ जायेत ॥ जायतां ॥ अजायत ॥ गमां स्व
रे ॥ उपधालोपः ॥ जज्ञे ॥ जज्ञाते ॥ जनिषीष्ट ॥ जनिता ॥ जनिष्यते ॥ अजनिष्यत ॥ अजनिष्ट ॥ पदादेस्तनि ॥
कर्तरि विवक्षितेभ्यः ॥ लुङ् इण् संयोगे तनो लुग्भवति ॥ दीपादिभ्यो वा ॥ पद दीप जन बुध पू
रि तायि प्यायिभ्य एतेभ्यः पदादिभ्यः ॥ जनिवध्योर्न वृद्धिः ॥ अजनि ॥ अजनिषातां ॥ अजनिषत ॥ दीपी दी
प्तौ ॥ दीप्यते ॥ दीप्येत ॥ दीप्यतां ॥ अदीप्यत ॥ दिदीपे ॥ दीपिषीष्ट ॥ दीपिता ॥ दीपिष्यते ॥ अदीपि
ष्यत ॥ अदीपिष्ट ॥ अदीपि ॥ पूरी आप्यायने ॥ पूर्य्यते ॥ पूर्येत ॥ पूर्यतां ॥ अपूर्यत ॥ पुपूरे ॥ पूरिषीष्ट ॥

पूरिता॥ पूरिष्यते॥ अपूरिष्यत॥ अपूरिष्ट॥ अपूरि॥ पद गतौ॥ पद्यते॥ पद्येत॥ पद्यतां॥ अपद्यत॥ पे
दे॥ पत्सीष्ट॥ पत्ता॥ पत्स्यति॥ अपत्स्यत॥ अपादि॥ अपत्सातां॥ अपत्सत॥ बुध अवगमने॥
बुध्यते॥ बुबुधे॥ आदिजबानां॥ सिस्योः॥ खसे चपा॥ भुत्सीष्ट॥ बोद्धा॥ भोत्स्यते॥ अभोत्स्य
त॥ अबुद्ध॥ अभुत्सातां॥ अभुत्सत॥ अबोधि ता॥ ष्टङ् संतापपूरणयोः॥ ताप्यते॥ ताप्येत॥ ३०
इत्यात्मनेपदिनः॥ ॥अथोभयपदिनः॥ ॥णह बंधने॥ नह्यति॥ नह्यते॥ ननाह॥ नेहतुः॥ ४
नेहुः॥ नेहे॥ नह्यात्॥ नत्सीष्ट॥ नहोद्धुः॥ नद्धा॥ नत्स्यति॥ नत्स्यते॥ अनत्स्यत॥ इति यविकरणा दि
वादयो धातवः॥ अथ स्वादयः॥ तत्रादावुभयपदिनः॥ षुञ् अभिषवे॥ ञकार उभयपदार्थः॥ ४०
आदेः स्नः॥ स्वादेर्नुः॥ स्वादेर्गणात् नुप्रत्ययो भवति च[illegible]र्षु परेषु॥ अपोपवादः॥ नूपः॥
विकरणनुप्रत्ययस्य उप्रत्ययस्य च गुणो भवति॥ पित्ति परे॥ [illegible]नोति॥ सुनुतः॥ नुधातोः सुन्वंति॥ सु
नोषि॥ सुनुथः॥ सुनुथ॥ सुनोमि॥ ओर्वमो र्वा लोपः॥ असंयोगादुत्तरस्य प्रत्ययसंबंधिनउका

रस्य वा लोपो भवति वमोः परयोः॥ सुनुवः॥ सुन्वः॥ सुनुमः॥ सुन्मः॥ सुनुते॥ सुन्वाते॥ सुन्वते॥
सुनुयात्॥ सुन्वीत॥ सुनोतु॥ सुनुतात्॥ सुनुतां॥ सुन्वंतु॥ ओर्वा हेः॥ प्रत्ययसंबंधिनउ
कारादुत्तरस्य हेर्लुग्भवति॥ वा ग्रहणात् संयोगादुत्तरस्य प्रत्ययसंबंधिनउकारादुत्तर
स्य न भवति॥ सुनु॥ सुनुतात्॥ सुनुतं॥ सुनुत॥ सुनुवानि॥ सुनुवाव॥ सुनवाम॥ सुनु
तां॥ असुनोत्॥ असुनुत॥ सुषाव॥ सुषुवतुः॥ सुषुवुः॥ सुषविथ॥ सुषोथ॥ सुषुवे॥
सूयात्॥ सोषीष्ट॥ सोता॥ सोता॥ सोष्यति॥ सोष्यते॥ असोष्यत्॥ असोष्यत॥ स्तुसुधूञां
पे सेरिड्वक्तव्यः॥ असावीत्॥ असोष्ट॥ चिञ् चयने॥ चिनोति॥ चिनुतः॥ चिनुयात्॥
चिन्वीत॥ चिनोतु॥ चिनुतां॥ चिन्वंतु॥ अचिनोत्॥ अचिनुत॥ चिनोतेः सणि दीर्वा कित्वे
वा च्यः॥ चिकाय॥ चिच्यतुः॥ चिच्युः॥ चिचयिथ॥ चिचेथ॥ चिक्ये॥ चिच्ये॥ चीयात्॥ चे
षीष्ट॥ चेता॥ चेता॥ चेष्यति॥ चेष्यते॥ अचेष्यत्॥ अचेष्यत॥ अचैषीत्॥ अचेष्ट॥ स्तृञ् आच्छा

दने॥ स्तृणोति॥ स्तृणुते॥ तस्तार॥ गुणोर्तिसंयोगाद्योः॥ [illegible]स्तरतुः॥ तस्तरुः॥ तस्तर्थ॥ तस्तरे॥ स्तर्यात्॥
संयोगादेः [illegible] तवृ ऋ धूञो सिस्योरात्मनेपदेषु वावक्तव्यः॥ स्तरिषीष्ट॥ स्तृषीष्ट॥
अस्तारीत्॥ अस्तृत॥ अस्तरिष्ट॥ वृञ् वरणे॥ वृणोति॥ ववार॥ ववर॥ ववृव॥ ववृतुः॥ व
वृः॥ वृणोते स्याद्विनित्यमिट्॥ ववरिथ॥ ववृषुः॥ ववृ॥ ववार॥ ववर॥ ववृव॥ ववृम॥ ववृषे॥
ववृढ्वे॥ व्रियात्॥ वरिषीष्ट॥ इट्लिङोः॥ वरीषीष्ट॥ वरिता॥ वरीता॥ वरिष्यति॥ वरी
ष्यति॥ अवरिष्यत्॥ अवरीष्यत॥ अवारीत्॥ अवरिष्ट॥ अवरीष्ट॥ अवृत॥ धूञ् कं ३८
पने॥ धूनोति॥ धूनुते॥ धूनुयात्॥ धून्वीत॥ दुधाव॥ दुधुवे॥ धूयात्॥ धविषीष्ट॥
धोषीष्ट॥ स्वरतिसूतिसूयतिधूञूदितो वा॥ धोता॥ धविता॥ धोष्यति॥ धविष्यति॥
अधोष्यत्॥ अधविष्यत्॥ अधावीत्॥ अधविष्ट॥ अधोष्ट॥ इत्युभयपदिनः॥ श्रीराम
चंद्रो जयति॥ ॥हि गतौ वृद्धौ च॥ हिनोति॥ हि कुत्वे स्यात् हिनोतेः कुत्वं वाच्यं॥ जिघाय॥

पा
हीत्॥ प्रहेता॥ हेष्यति॥ अहेष्यत्॥ अहैषीत्॥ शक्लृ शक्तौ॥ री शक्नोति॥ शशाक॥ शेकतुः॥
शेकुः॥ शक्यात्॥ शक्ता॥ शक्ष्यति॥ अशक्ष्यत्॥ अशकत्॥ धिवि प्रीणने॥ इदितो नुम्॥
धिविकृण्व्योर्नौ न्वलोपो वाच्यः॥ धिनोति॥ धिनुयात्॥ धिनोतु॥ अधिनोत्॥ दिधि
न्व॥ धिन्व्यात्॥ धिन्विता॥ धिन्विष्यति॥ अधिन्विष्यत्॥ अधिन्वीत्॥ टुदु हिंसायां॥ दुनो
ति॥ चकृ एवं धिनोतिवत्॥ श्रु श्रवणे॥ श्रुवः शृ च॥ श्नुप्रत्ययः परेषु॥ शुश्राव॥ शुश्रोथ॥ श्रूया
त्॥ श्रोता॥ श्रोष्यति॥ अश्रोष्यत्॥ अश्रौषीत्॥ ॥इति परस्मैपदिनः॥ ॥अशू व्याप्तौ॥
उकारविलौ॥ अश्नुते॥ अश्नुवीत॥ अश्नुतां॥ अश्नुत॥ नुगशां॥ आनशे॥ उदि[illegible]तो वा॥
अशिषीष्ट॥ अक्षीष्ट॥ अशिता॥ अष्टा॥ अशिष्यते॥ अक्ष्यते॥ आशिष्यत॥ आक्ष्यत॥
आशिष्ट॥ आष्ट॥ आक्षाताम्॥ आशत॥ इत्यात्मनेपदिनः॥ इति विकरण स्वादयः॥ अथ नु
रुधादयः तत्रादावुभयपदिनः॥ रुधिर् आवरणे॥ इरित्॥ रुधादिभ्यः श्नम्॥ रुधादेर्गणात् श्नम्प्र

त्ययो भवति चतुर्षु परेषु ॥ अपोपवादः ॥ म [illegible] रस्यानन्नियमार्थः ॥ णत्वं ॥ तयोर्द्धः ॥ रुणद्धि
न म सो स्य ॥ रुंद्धः ॥ रुंधंति ॥ रुणत्सि ॥ रुंद्ध ॥ रुंद्ध ॥ रुणध्मि ॥ रुंध्वः ॥ रुंध्मः ॥ रुंधे ॥ रुंधाते ॥
रुंधते ॥ रुंध्यात् ॥ रुंधीत ॥ रुणद्धु ॥ रुंधां ॥ अरुणत् ॥ अरुणद्धं ॥ अरुंद्ध ॥ रुरोध ॥ रुरुधतुः ॥ रु
रुधुः ॥ रुरोधिथ ॥ रुरुधिषे ॥ रोद्धा ॥ रोत्स्यति ॥ अरोत्स्यत् ॥ अरोत्स्यत ॥ अनिटो नावतः ॥
अरौत्सीत् ॥ सिस्योः ॥ अरुद्ध ॥ अरुत्साता ॥ अरुत्सत ॥ इरितो वा ॥ अरुधत् ॥ उछृदिर् दीप्ति दे ४०
देवनयोः ॥ उदृ रावितौ ॥ छृणत्ति ॥ छृंतः ॥ छृंदंति ॥ छृंते ॥ छृंद्यात् ॥ छृंदीत ॥ छृणत्तु ॥ छृं
तां ॥ अछृणत् ॥ अछृणदं ॥ दसः ॥ अछृणः ॥ अछृणद ॥ अछृणत ॥ अछृंत ॥ चछर्द ॥ चछृदे ॥ नृ
तह्द छृत् तृत छृदां सस्यासी सेरिट् वा वक्तव्यः ॥ चछृदिषे ॥ चछृत्से ॥ छृद्यात् ॥ छृत्सीष्ट ॥ छ
र्दिषीष्ट ॥ छर्दिता ॥ छर्दिष्यति ॥ छर्त्स्यति ॥ इरितो वा ॥ अछृदत् ॥ अछर्दीत् ॥ अछर्दि
ष्ट ॥ उतृदिर् हिंसानादरयोः ॥ तृणत्ति ॥ तृंतः ॥ तृंदंति ॥ तृंते ॥ तृंद्यात् ॥ तृंदीत ॥ तृणत्तु ॥ तृं

त्तां ॥ अतृणत् ॥ अतृणद् ॥ अतृंत ॥ ततर्द ॥ ततृदे ॥ तृद्यात् ॥ तृत्सीष्ट ॥ तर्दिषीष्ट ॥ तर्दिता ॥
तर्दिष्यति ॥ अतर्दिष्यत ॥ अतृदत् ॥ अतर्दीत् ॥ अतर्दिष्ट ॥ इन्धुभयपदिनः ॥ शिष्लृ वि
शि शेषणे ॥ शिनष्टि ॥ शिंष्टः ॥ शिंषंति ॥ शिष्यात् ॥ शिनष्टु ॥ अशिनट् ॥ शिशेष ॥ शिष्यात् ॥
शेष्टा ॥ शेक्ष्यति ॥ अशेक्ष्यत् ॥ अशिषत् ॥ तृह हिसि हिंसायां ॥ तृहो नमि सते इ माग
मः पिति हलि ॥ तृणेढि ॥ तृण्ढः ॥ तृणेढु ॥ अतृणेट् ॥ अतर्हीत् ॥ इदितः ॥ नुमः ॥ नम
प्रत्ययात्पूरस्यनस्यल्लोपो भवति ॥ हिनस्ति ॥ हिंस्तः ॥ हिंसंति ॥ हिंस्यात् ॥ हिनस्तु ॥ अहि न
नत् ॥ अहिनद् ॥ दिपि सस्य तः ॥ सिपि वा ॥ अहिनः ॥ अहिनत् ॥ जिहिंस ॥ हिंस्यात् ॥
हिंसिता ॥ हिंसिष्यति ॥ अहिंसिष्यत ॥ अहिंसीत् ॥ भंजो आमर्दने ॥ ओ इत् ॥ भनक्ति ॥
बभंज ॥ भंज्यात् ॥ भंक्ता ॥ भंक्ष्यति ॥ अभंक्ष्यत् ॥ सावनिटो वृद्धिः ॥ अभांक्षीत् ॥ अभां
क्तां ॥ अभांक्षुः ॥ अंजू व्यक्तिम्रक्षणकांतिग [illegible] षु ॥ अनक्ति ॥ अं [illegible] ज्यात् ॥ अनक्तु

आनक्॥ आनंज॥ अंज्यात्॥ अंजिता॥ अंक्ता॥ अंजिष्यति॥ अंक्ष्यति॥ आंजिष्यत्॥ आं
क्ष्यत्॥ अंजेः सेनित्यमिट्वक्तव्यः॥ आंजीत्॥ इति परस्मैपदिनः॥ ञि इंधी दीप्तौ॥ ञि इं
द्धे॥ इंद्धे॥ इंधीत॥ इंद्धां॥ ऐंद्ध॥ इंधांचक्रे॥ इंधिषीष्ट॥ इंधिता॥ इंधिष्यते॥ ऐंधि
ष्यत॥ ऐंधिष्ट॥ इत्यात्मनेपदिनः॥ इति नविकरण रुधादयः॥ सर्वउभयपदिनः॥
तनु विस्तारे॥ तनादेरूप्॥ तनादेर्गणा दुप्रत्ययो भवति चतुर्षु परेषु॥ शपोपवादः॥
नूपः॥ तनोति॥ तनुते॥ तनुयात्॥ तन्वीत॥ तनोतु॥ तनुतां॥ अतनोत्॥ अतनुत॥
ततान॥ तेनतुः॥ तेनुः॥ तेने॥ तन्यात्॥ तनिषीष्ट॥ तनिता॥ तनिष्यति॥ तनिष्यते॥ अ ५१
तनिष्यत्॥ अतनिष्यत॥ अतानीत्॥ अतनीत्॥ अतनिष्ट॥ तनादेः॥ तनूथासोर्वा सि
लोपो वाच्यः॥ लोपस्त्वनुदात्तानां॥ अतत॥ अतथाः॥ अतनिष्ठाः॥ क्षणु हिंसायां॥ क्ष
णोति॥ क्षणुते॥ क्षणुयात्॥ क्षण्वीत॥ क्षणोतु॥ क्षणुतां॥ अक्षणोत्॥ अक्षणुत॥

चक्षाण॥ चक्षणे॥ क्षण्यात्॥ क्षणिषीष्ट॥ क्षणिता॥ क्षणिष्यति॥ क्षणिष्यते॥ अक्षणि
ष्यत्॥ अक्षणिष्यत॥ अक्षणीत्॥ अक्षणिष्ट॥ अक्षत॥ अक्षथाः॥ अक्षणिष्ठाः॥ डु
कृञ् करणे॥ डुञावितौ॥ गुणः॥ नूपः॥ करोति॥ ङित्यदुः॥ करोतेरकारस्य उका
रो भवति ङिति तिङि च सार्वधातुके परतः॥ कुरुतः॥ कुर्वंति॥ करोषि॥ कुरुथः॥ कुरुथ॥ करो
मि॥ उतो नित्यं वमोः लोपो वाच्यः॥ कुरुछुरोर्न दीर्घः॥ कुर्वः॥ कुर्मः॥ कुरुते॥ उ
तो ये॥ कृञोऽतेरस्य उप्रत्ययस्य लोपो भवति ये परे॥ कुर्यात्॥ कुर्वीत॥ क
रोतु॥ करवाणि॥ कुरुतां॥ करवै॥ अकरोत्॥ अकुरुत॥ चकार॥ चक्रतुः॥ चक्रुः॥
चकर्थ॥ चक्रे॥ क्रियात्॥ कृषीष्ट॥ कर्ता॥ करिष्यति॥ करिष्यते॥ अकरिष्यत्॥ अ
करिष्यत॥ अकार्षीत्॥ अकृत॥ अकृषातां॥ अकृषत॥ संपर्युपेभ्यः करोतेर्भूष
णे सुट्॥ संस्करोति॥ अड्भ्यासव्यवायेऽपि सुट्॥ समस्करोत्॥ संचस्कार॥ ससु

इट्‌ ॥ नित्यमिट्‌ व॰ ऋव्यः ॥ संचस्करिथ ॥ एवं उपस्कुरुते ॥ इत्युविकरणास्तनादयः ॥ तु
द व्यथने ॥ तुदादिभ्यः शः ॥ तुदादेर्गणात्‌ शप्रत्ययो भवति चतुर्षु परेषु ॥ अपवादः ॥ ङित्वा
त्‌ न गुणः ॥ तुदति ॥ तुदते ॥ तुदेत्‌ ॥ तुदेत ॥ तुदतु ॥ तुदतां ॥ अतुदत्‌ ॥ अतुदत ॥ तु
तोद ॥ तुतुदे ॥ तुद्यात्‌ ॥ तुत्सीष्ट ॥ तोत्ता ॥ तोत्स्यति ॥ तोत्स्यते ॥ अतोत्स्यत्‌ ॥ अतोत्स्यत ॥
अतौत्सीत्‌ ॥ अतौत्तां ॥ अतौत्सुः ॥ अतुत्त ॥ अतुत्सातां ॥ अतुत्सत ॥ भ्रस्जो पाके ॥ ओ भ्रस्ज
अन्त्यसोनः ॥ ज्ञसपरत्वभावे सस्य जो भवति जकारे परे ॥ ग्रहिज्येति च ॥ भृज्जति ॥ भृ ४२
ज्जते ॥ बभ्रज्ज ॥ स्कोः संयोगात्‌ कित्वाभावात्‌ न संप्रसारणं ॥ बभ्रज्जतुः ॥ बभ्रज्ज ॥ भृ
ज्जेतः ॥ सकाररेफौ लुप्त्वा रमागमो वा वाच्यः ॥ बभर्ज ॥ भृज्ज्यात्‌ ॥ भ्रक्षीष्ट ॥
भ्रष्टा ॥ भर्ष्टा ॥ भ्रक्ष्यति ॥ भर्क्ष्यति ॥ अभ्रक्ष्यत्‌ ॥ अभर्क्ष्यत ॥ अभ्राक्षीत्‌ ॥ अभा
र्क्षीत्‌ ॥ अभ्रष्ट ॥ अभर्ष्ट ॥ मुच्लृ मोक्षणे ॥ मुचादेर्नुम्‌ ॥ मुचादीनां नुमागमो भवति

चे
शप्रत्यये परे ॥ मुंचति ॥ मुंचते ॥ मुंत्‌ ॥ मुंचेत ॥ मुंचतु ॥ मुंचतां ॥ अमुंचत्‌ ॥ अमुंचत
मुमोच ॥ मुमुचे ॥ मुच्यात्‌ ॥ सिस्योः ॥ मुक्षीष्ट ॥ मोक्ता ॥ मोक्ष्यति ॥ मोक्ष्यते ॥ अमोक्ष्य
त्‌ ॥ अमोक्ष्यत ॥ अमुचत्‌ ॥ अमुचत ॥ लिप उपदेहे ॥ मुचलुपविदलिपसिचकृतखिदपि
शाः खिद एते मुचादयः ॥ लिंपति ॥ लिलेप ॥ अलिपत्‌ ॥ अलिपत ॥ लिपिसिचि ह्वय
तीनामात्मनेपदे से ङ्वा वाच्यः ॥ अलिप्त ॥ षिचू क्षरणे ॥ सिंचति ॥ सिषेच ॥ सिच्या
त्‌ ॥ सिक्षीष्ट ॥ सेक्ता ॥ सिक्ष्यति ॥ असेक्ष्यत्‌ ॥ असिचत्‌ ॥ असिचत ॥ असिक्त ॥ इत्युभयप
दिनः ॥ अथ परस्मैपदिनः ॥ कृती छेदने ॥ कृंतति ॥ चकर्त ॥ कर्तिता ॥ कर्तिष्यति ॥ क
र्त्स्यति ॥ अकर्तिष्यत ॥ अकर्तीत ॥ ओव्रश्चू छेदने ॥ ओकार इतो ग्रहिज्येति च ॥ वृ
श्चति ॥ शासधोरैक्यं ॥ छत्वं शजादेशः ॥ वव्रश्च ॥ वव्रश्चतुः ॥ वव्रश्चुः ॥ वव्रश्चिथ ॥
वव्रष्ठ ॥ वृश्च्यात्‌ ॥ उदित्वाद्वा ॥ व्रश्चिता ॥ व्रष्टा ॥ व्रश्चिष्यति ॥ व्रक्ष्यति ॥ अव्रश्चिष्य

न्॥ अव्रक्ष्यत्॥ व्रश्च्यात्॥ अव्राक्षीत्॥ अव्राष्टां॥ कॄ विक्षेपे॥ ॠत इद्॥ किरति॥ च
कार॥ चकरतुः॥ चकरुः॥ कीर्यात्॥ करिता॥ करीता॥ वृतो ग्रहो॥ करिष्यति॥ क
रीष्यति॥ अकरिष्यत्॥ अकरीष्यत्॥ अकारीत्॥ उपा[illegible]त्किरते छेदने सुट
वाच्यः॥ उपस्किरति॥ गॄ निगरणे॥ गिरति॥ [illegible]॥ गिरते॥ रेफस्य लो वा स्वरे वाच्य॥ गि
लति॥ जगार॥ जगरतुः॥ जगरुः॥ अगारीत्॥ स्पृश संस्पर्शने॥ स्पृशति॥ पस्प
र्श॥ स्पृश्यात्॥ स्प्रष्टा॥ स्पर्ष्टा॥ स्प्रक्ष्यति॥ स्पर्क्ष्यति॥ अस्प्रक्ष्यत्॥ अस्प्राक्षीत्॥
रो वा॥ अ॥ अस्पार्क्षीत्॥ स्पृशादीनां वा सिः॥ तत्पक्षे हसषां तत्सक्॥ अस्पृक्षत्॥
प्रछ ज्ञीप्सायां॥ संप्रसारणं॥ पृच्छति॥ पप्रच्छ॥ पप्रच्छतुः॥ पप्रच्छुः॥ पप्रच्छिथ॥ ४३
पप्रष्ठ॥ पृच्छ्यात्॥ प्रष्टा॥ प्रक्ष्यति॥ अप्रक्ष्यत्॥ अप्राक्षीत्॥ सृज विसर्गे॥ सृजति
ससर्ज॥ ससृजतुः॥ ससृजुः॥ ससर्जिथ॥ ससृष्ठ॥ सृज्यात्॥ रागे वे से दृशां॥ स्रष्टा॥ स्र

क्ष्यति॥ अस्रक्ष्यत्॥ अस्राक्षीत्॥ टुमस्जो शुद्धौ॥ टुओ इत्॥ अन्त्यच सो जः॥ मज्जति॥
ममज्ज॥ ममज्जतुः॥ ममज्जुः॥ मंक्ता॥ मस्जि नशोर्झसे नुम्॥ मंक्ष्यति॥ अमंक्ष्यत्॥ अ
मांक्षीत्॥ अमांक्तां॥ अमांक्षुः॥ विछ गतौ॥ आयः॥ विछायति॥ विछायां चकार॥ वि
विछ॥ विछाय्यात्॥ विछ्यात्॥ विछायिता॥ विछिता॥ विछायिष्यति॥ विछिष्यति॥ अ
विछायिष्यत्॥ अविछिष्यत्॥ अविछायीत्॥ अविछीत्॥ इषु इच्छायां॥ गमां छः॥ इच्छ
ति॥ इयेष॥ एषिता॥ एष्टा॥ इति परस्मैपदिनः॥ मृङ् प्राणत्यागे॥ अयकि॥ ऋकार
स्य रिङादेशो भवति अकारि प्रत्यये यकि च परे॥ तुधातोः॥ म्रियते॥ म्रियते लुङ् लि ति
ङोः चतुर्ष्वेवात्मनेपदं नान्यत्र॥ सपरोक्षे स्यतादौ म्रियते परस्मैपदं वाच्यं॥ ममा
र॥ मम्रतुः॥ मम्रुः॥ मृषीष्ट॥ मर्ता॥ मरिष्यति॥ अमरिष्यत्॥ अमृत॥ [illegible]॥ दृङ्
आदरे॥ द्रियते॥ दद्रे॥ दृषीष्ट॥ दरिष्यति॥ अदृत॥ धृङ् अवस्थाने॥ मृङ्वत् प्र
धृयते

क्रिया॥ ओविजी भयचलनयोः॥ विजते॥ विजेत॥ विजतां॥ अविजत॥ विविजे॥ वि-
जिता॥ विजः परइट् कित् वक्तव्यः॥ ततो नोपधाया॥ गुणः॥ विजिष्यते॥ अविजिष्य-
त॥ अविजिष्ट॥ ओलस्जी व्रीडे॥ लज्जते॥ लज्जेत॥ लज्जतां॥ अलज्जत॥ ललज्जे॥ ल-
ज्जिता॥ लज्जिष्यते॥ अलज्जिष्यत॥ अलज्जिष्ट॥ इति विकरणस्तुदादयः॥ अथ
क्र्यादयः॥ तत्रोभयपदिनः॥ डुक्रीञ् द्रव्यविनिमये॥ डुञावितौ॥ ना क्र्यादेः॥ क्र्या-
देर्गणान् नाप्रत्ययो भवति चतुर्षु परेषु॥ अपोपवादः॥ णत्वं॥ क्रीणाति॥ ना ई हसे ना ५५
॥ नाप्रत्ययस्याकारस्य ईकारो भवति ङिति हसे परे॥ क्रीणीतः॥ नातः॥ नाप्रत्ययस्याकार-
स्य लोपो भवति॥ स्वरे परे॥ क्रीणंति॥ क्रीणासि॥ क्रीणीथः॥ क्रीणीथ॥ क्रीणामि॥ क्रीणी-
वः॥ क्रीणीमः॥ क्रीणीते॥ क्रीणीयात्॥ क्रीणीत॥ क्रीणीतु॥ क्रीणीतां॥ अक्रीणीत्॥ अक्री-
णीत॥ चिक्राय॥ चिक्रियतुः॥ चिक्रियुः॥ चिक्रयिथ॥ चिक्रेथ॥ चिक्रिये॥ क्रीयात्॥

क्रेषीष्ट॥ क्रेता॥ क्रेष्यति॥ क्रेष्यते॥ अक्रेष्यत्॥ अक्रेष्यत॥ अक्रैषीत्॥ अक्रेष्ट॥ पूञ् प-
वने॥ प्वादेर्ह्रस्वः॥ प्वादीनां ह्रस्वो भवति चतुर्षु परेषु॥ पुनाति॥ पुनीयात्॥ पुनीत॥ पुना-
तु॥ पुनीतां॥ अपुनीत्॥ अपुनीत॥ पुपाव॥ पुपुवतुः॥ पुपुवुः॥ पुपुवे॥ पूयात्॥ पविषीष्ट॥ पवि-
ता॥ पविष्यति॥ अपविष्यत॥ अपावीत्॥ अपविष्ट॥ कॄञ् हिंसायां॥ कृणाति॥ कृणीते॥ च-
कार॥ चकरे॥ कीर्यात्॥ करिषीष्ट॥ अकारीत्॥ ग्रह उपादाने॥ गृह्णाति॥ गृह्णीयात्॥
गृह्णातु॥ गृह्णीतात्॥ गृह्णीतां॥ गृह्णंतु॥ हसादान हौ॥ हसान्नाव क्र्यादिर्गणात् आ-
न प्रत्ययो भवति हौ परे॥ नाप्रत्ययाभावः॥ गृहाण॥ अगृह्णात्॥ जग्राह॥ गृह्यात्॥
ग्रहिषीष्ट॥ इटो ग्रहां॥ ग्रहीता॥ ग्रहीष्यति॥ अग्रहीष्यत्॥ अग्रहीत्॥ अग्रहिष्ट॥ इ-
त्युभयपदिनः॥ पुष पुष्टौ॥ पुष्णाति॥ पुषाण॥ अपुष्णात्॥ पुपोष॥ पुष्यात्॥ पोषिता॥
पोषिष्यति॥ अपोषिष्यत्॥ अपोषीत्॥ मुष स्तेये॥ मुष्णाति॥ मुमोष॥ मुष्यात् मोषि-

मा॥ मोषिष्यति॥ अमोषिष्यत्॥ अमोषीत्॥ शृ हिंसायां॥ शृणाति॥ शशार॥ शश
रतुः॥ शशरुः॥ शीर्यात्॥ शरिता॥ शरीता॥ शरिष्यति॥ शरीष्यति॥ अशरिष्यत्
अशरीष्यत्॥ अशारीत्॥ ज्या वयोहानौ॥ ग्रहादित्वात्संप्रसारणं॥ जिनाति॥ जि
नीयात्॥ जिज्यौ॥ जिज्यतुः॥ जिज्युः॥ जिज्यिथ॥ जिज्याथ॥ जीयात्॥ ज्याता॥ ज्या
स्यति॥ अज्यास्यत्॥ अज्यासीत्॥ ज्ञा अवबोधने॥ ज्ञाजनोर्जा॥ जानाति॥ ज्ञा ज्ञौ
स्य जज्ञौ॥ ज्ञायात्॥ ज्ञेयात्॥ ज्ञास्यति॥ अज्ञास्यत्॥ अज्ञासीत्॥ कुष निष्कर्षे॥ कुष्णा ५५
ति॥ कुषाण॥ कुकोष॥ कुष्यात्॥ कोषिता॥ कोषिष्यति॥ अकोषिष्यत्॥ अकोषीत्॥ ४५
अश भोजने॥ अश्नाति॥ अशान॥ आश॥ आशिता॥ अशिष्यति॥ आशिष्यत्॥ आ
शीत्॥ इति परस्मैपदिनः॥ वृङ् संभक्तौ॥ वृणीते॥ वृणीत॥ वृणीतां॥ अवृणीत॥ वव्रे॥
ववृषे॥ [illegible]॥ वृषीष्ट॥ वरिषीष्ट॥ वरीषीष्ट॥ वरिता॥ अवरिष्ट॥ अवरीष्ट॥ अवृत॥

इत्यात्मनेपदिनः॥ इति नाविकरणः क्र्यादयः॥ अथ चुरादयः॥ चुर स्तेये॥ चुरादेः
चुरादेर्गणात्स्वार्थे णिच्प्रत्ययो भवति॥ उपधायाग्रुणः॥ स धातुः॥ अपगुणपः॥ चो
रयति॥ चोरयेत्॥ चोरयतु॥ अचोरयत्॥ चोरयांचकार॥ चुचोर॥ चोर्यात्॥ णेरनुद्वि
ष॥ णेः॥ अङि लघोरुपधायाः॥ लघोर्दीर्घः॥ अचूचुरत्॥ चिती संज्ञाने॥ चेतयति॥
चेतयेत्॥ चेतयतु॥ अचेतयत्॥ चुरादेर्णिर्वेति केचित्॥ चितति॥ अर्च पूजायां॥ अ
रा र्चयति॥ स्वरादेः परः॥ स्वरादेर्धातोरपरोर्द्धं तोये अवयवो अद्विरुक्तः स स्वरो द्वि भवति न
दराः संयोगादयो द्विर्न इति रेफस्य न द्वित्वं॥ आर्चिचत्॥ कृत संशब्दे॥ उपधाया ऋकारस्य
इरादेशः णिच्प्रत्यये वाच्यः॥ कीर्तयति॥ अचिकीर्त्तत्॥ अचीकृतत्॥ गण संख्याने॥ अकारो
तः अल्लोपस्य स्थानिवत्त्वात् न वृद्धिः॥ गणयति॥ अल्लोपिनो नाङ्कार्यं॥ अजगणत्॥ कथ
णयोरङ्कार्यं वेति केचित्॥ अजीगणत्॥ अचीकथत्॥ कथ वाक्यप्रबंधे॥ कथयति॥ अ

चकथ्यत॥ अचीकथत्॥ इति चुरादयः॥ २०॥ गणानिस्माप्ताः॥ धातोः प्रेरणे॥ प्रयोजकव्यापा
रेर्थे धातोर्ञिप्रत्ययो भवति कुर्वंतं प्रेरयति यः स प्रयोजकः॥ कारयति॥ कारयते॥ अ
चीकरत्॥ हनो घत्॥ हंतेर्घदादेशो भवति ञिति णिति णप्वर्जिते परतः॥ अजीघतत्
शद्लृ शातने॥ शदेशात्॥ शदेः शादादेशो भवति ञौ परे॥ शातयति॥ अशीशतत्॥ रातो ञौ पु
क्॥ रुगतावित्यस्याकारांतस्य च पुगागमो भवति ञौ परे॥ डुदाञ् दाने॥ दापयति॥ अदीद
पत्॥ धापयति॥ अदीधपत्॥ पुगंतस्य गुणो वक्तव्यः॥ रुगतौ॥ अर्पयति॥ क्षेपयति॥ अ १६
चिक्षिपत्॥ ष्ठा गतिनिवृत्तौ॥ स्थापयति॥ तिष्ठतेः उपधाया इकारो ङि वक्तव्यः॥ ततो द्वित्वं॥ अति
ष्ठिपत्॥ पादेर्युक्॥ पाशाछासाह्वेव्येवेञां युगागमो भवति ञौ परे॥ पाययति॥ पिबते
रङि पूर्वैकारोपधालोपो वक्तव्यो॥ अपीप्यत्॥ शो तनुकरणे॥ संध्यक्षराणामा॥ शाययति॥
अशीशयत्॥ छो छेदने॥ छाययति॥ अचीछयत्॥ षोंतकर्मणि॥ साययति॥ ह्वेञ् स्पर्धा

यां॥ ह्वाययति॥ ह्वाययते॥ रङि संप्रसारणं॥ युगभावश्च वक्तव्यः॥ कृतसंप्रसारणस्य ह्वे
यते रङि संप्रसारणे गुणः वृद्धिर्वा वाच्यो॥ अजुहावत्॥ अजूहवत्॥ अजूहवतां॥ व्येञ्
संवरणे॥ व्याययति॥ अविव्ययत्॥ वेञ् तंतुसंताने॥ वाययति॥ अवीवयत्॥ रभलभोः
स्वरेण घञि विना नुम्वाच्यः॥ रभ राभस्ये॥ रभ सो वेगहर्षयोः॥ रंभयति॥ अररंभत्॥
लंभयति॥ अललंभत्॥ अललंभातां॥ अललंभत॥ प्रीञ् धूञोर्नुक्॥ अनयोः नुगा
गमो भवति ञौ परे॥ प्रीञ् तर्पणे॥ प्रीणयति॥ अपिप्रिणत्॥ धूञ् कंपने॥ धूनयति॥ अदू
धुनत्॥ स्मिङ् ईषद्धसने॥ स्मयतेरात्वं भवति ञौ परे॥ विस्मापयते॥ असिस्मपत॥ आ
ति किं॥ विस्माययति॥ असिस्मयत्॥ रुहेर्ञौ वा पो वाच्यः॥ रुह जन्मनि प्रादुर्भावे॥ रोह
यति॥ रोपयति॥ अरूरुहत्॥ कृपू सामर्थ्ये॥ कल्पयति॥ उपधाया ऋवर्णस्य ङि लृ वा व
क्तव्यः॥ अचीकॢपत्॥ अचकल्पत॥ वृतु वर्त्तने॥ वर्त्तयति॥ अवीवृतत्॥ अववर्त्तत्॥

मृजूषशुद्धौ॥ मृजेर्णौ वृद्धिः॥ मार्जयति॥ अमीमृजत्॥ अममार्जत्॥ दुक्रादेर्णौ पुक्च
इङ्ङ्क्नीज्ञीनामात्वं भवति णौ परे॥ ह्रीव्लीरीक्नूयीक्ष्मायीनां पुगागमो वक्तव्यः॥ आप
अ रे॥ इङ् अध्ययने॥ अध्यापयति॥ अध्यापिपत्॥ डुक्रीञ् द्रव्यविनिमये॥ क्रापयति॥
अचिक्रपत्॥ जि जये॥ जापयति॥ अजीजपत्॥ ह्री लज्जायां॥ ह्रेपयति॥ अजिह्रिप
वि त्॥ व्ली वरणे॥ व्लेपयति॥ अविव्लिपत्॥ रीङ् क्षरणे॥ रेपयति॥ अरीरिपत्॥ क्नूयी दुर्गं
धे आर्द्रत्वे च॥ भवयोर्वसेर्हकारे च लोपो वक्तव्यः॥ क्नोपयति॥ क्नूयतेर्णौ गुणो वक्त ४१
व्यः॥ अचुक्नुपत्॥ क्ष्मायी विधूनने॥ क्ष्मापयति॥ अचिक्ष्मपत्॥ लीङ् श्लिषि
लयतेर्णौ आत्वं वा॥ विलापयति॥ विलाययति॥ व्यलीलपत्॥ लालीः क्रमात् नुक्लुकौ
वा॥ विलीनयति॥ व्यलीलिनत्॥ ला ग्रहे॥ लापयति॥ अलीलपत्॥ लालयति
अलीललत्॥ नरितः॥ ऋकारेतोऽनेकस्वरस्य शा॥ सख्यादि उक्तेऽकार्यं न भवति॥

ढौकृ गतौ॥ ढौकयति॥ अडुढौकत्॥ टुयाचृ याञ्चायां॥ याचयति॥ अययाचत्॥ शासु
अनुशिष्टौ॥ शासयति॥ अशशासत्॥ दरिद्रयति॥ अददरिद्रत्॥ अददरिद्र
त्॥ दुषेर्णौ दीर्घो वक्तव्यः॥ दुष वैकृत्ये॥ दूषयति॥ दोषो णौ वा गुणो वक्तव्यः॥
दोषयति॥ अदूदुषत्॥ घट चेष्टायां॥ मितां ह्रस्वः॥ धातुपाठे मित इत्येवं पठितानां ह्रस्वो
भवति॥ घटयति॥ अजीघटत्॥ व्यथ दुःखभयचलनयोः॥ व्यथयति॥ अविव्यथत्
एवं पंचपंचाशता रूपे॥ जनी जॄष् क्नसु रंजोऽमन्ताश्च एते मितः॥ जनयति॥ अजीज
नत्॥ जॄष् वयोहानौ॥ षुड्डत्॥ जरयति॥ अजीजरत्॥ क्नसु करणदीप्तौ॥ क्नसयति॥
अचिक्नसत्॥ रंज रागे॥ रंजेर्णौ नलोपो वाच्यः॥ रजयति॥ अरीरजत्॥ शम दम उपशमे॥
शमयति॥ दमयति॥ अशीशमत्॥ अदीदमत्॥ ज्ञीनातेर्वा णौ ह्रस्वः॥ ज्ञा अवबोधने॥
ज्ञीपयति॥ ज्ञपयति॥ अजिज्ञपत्॥ अजिज्ञपत्॥ ज्वल ग्लास्नाश्च वा मितः॥ ज्वल दीप्तौ॥

ज्वलयति॥ ज्वालयति॥ अजिज्वलत्॥ ग्लापयति॥ अजिग्लपत्॥ स्नापयति॥ स्नपयति
॥ असिस्नपत्॥ इणो जौ वा गमिर्वाच्यः॥ गमयति॥ अजीगमत्॥ आययति॥ आयि
यत्॥ ओ स्फायी वृद्धौ॥ स्फायो जौ वो वाच्यः॥ स्फावयति॥ अपिस्फवत्॥ भियो जौ वा
षुगात्वे वाच्ये॥ भीषयति॥ भाययति॥ अबीभिषत्॥ अबीभयत्॥ इति ण्यन्तप्रक्रिया
समाप्ताः॥ राममेकं सत्यं॥ अथ सन्प्रक्रिया॥ इच्छायामात्मनः सः॥ धातोरिच्छायामर्थे स
प्रत्ययो भवति॥ सा चेत् स्वसंबंधीनी द्विस्त्व॥ अभ्यासनः॥ भवितुमिच्छति॥ बुभूषति॥ बु ५
भूः से॥ उश्च॥ च इत् तस्मादुवर्णान्तात् धातोः ग्रहगुहोश्च सेपरे इट् न भवति॥ ना ५८
नि [illegible] टि से॥ इट्वर्जिते सप्रत्यये परे गुणो न भवति॥ तॄ प्लवनतरनयोः॥ नामन्तात्य
रस्य सस्य कित्वं वाच्यं॥ ऋत इद्॥ तरितुमिच्छति तितीर्षति॥ अतितीर्षत्॥ चिञ् चय
ने॥ चिनोतेः सणि कित्वं वाच्यं॥ चिकीषति॥ चिचीषति॥ जि जये॥ सपरे श्रयोर्गिः

जिगीषति॥ जेतुमिच्छति॥ यु मिश्रणे॥ युयूषति॥ डुपचष् पाके॥ पिपक्षति॥ पक्तुमिच्छ
ति॥ गुणः प्रवृत्ति अ[illegible]र्थो न्यत्र धात्वर्थो अमुख्यः सप्रत्यये मुख्यः तेन काष्ठेन पिप
क्षतीत्यत्र तृतीयायाः पाकेन संबंधो न त्विच्छया॥ पा पाने॥ पिपासति॥ पातुमिच्छति
मृङ् प्राणत्यागे॥ मुमूर्षति॥ मर्तुमिच्छति॥ पॄ रूर्॥ पॄ पालनपूरनयोः॥ पुपूर्षति॥ वो
रि त्तरस्य कृ वाच्यः॥ सेङ् वृञ् वरणे॥ वरितुमिच्छति॥ वुवूर्षति॥ रुद विद मुष ग्रहि स्वपि
प्रच्छः सकित्वाच्यः॥ रुदिर् अश्रुविमोचने॥ रुरुदिषति॥ विद ज्ञाने॥ विविदिष रामन
ति॥ मुष स्तेये॥ मुमुषिषति॥ ग्रह उपादाने॥ हो ढः॥ आदि जबानां॥ षढोः कः रामान
से॥ षत्वं॥ स्कोः॥ जिघृक्षति॥ ग्रहीतुमिच्छति॥ स्वप्तुमिच्छति॥ सुषुप्सति॥ प्रच्छ ज्ञी रामान
प्सायां॥ ऋ गृ दृ धृ प्रच्छि स्मिङ् अंजू अशूङ् इत्तिभ्यः सस्य इट् कवाच्यः॥ पिपृच्छिषति॥
चिकरिषति॥ दिदरिषति॥ दिधरिषति॥ सिस्मयिषति॥ अंजिजिषति॥ अशि

जिशिषति॥अरिरिषति॥अदभक्षणे॥सिसयोरिति घस्रादेशः॥सस्तोनपि॥
अत्तुमिछति॥जिघत्सति॥हंतीङः॥सोणित॥जिघांसति॥इङःसेगमवाच्यः॥
अधिजिगांसते॥गमेःसस्येटवाच्यः॥जिगमिषति॥इस्ये अपितदाधारभलभश
कपत्‌पदमिमामाङ्‌मेहिंसार्थराधां स्वरस्य सेपरे इसादेशो भवति॥पूर्वस्यचलोपः
दित्सति॥धित्सति॥स्कोराद्योश्च॥रवसेबपा॥रिप्सते॥लिप्सते॥शिक्षति॥पतोवे
ट॥पित्सति॥पिपतिषति॥पित्सते॥माङ्‌माने॥मित्सति॥मित्सते॥ओप्नोतेरी॥अप्नो
तेराकारस्य ईकारो भवति सेपरे॥पूर्वलोपश्च॥ओप्लृव्याप्तौ॥ईप्सति॥अतीरनायो
वा॥अतेरिच्छायांसस्थानेवा अनायप्रत्ययो भवति॥अज्ञानायति॥अशिशिषति॥ ४९
तनिदरिद्रात्योःसेवाइड्वाच्यः॥तितनिषति॥तितंसति॥तनेःसेवादीर्घः॥तितांसति
दरिद्रातेपलोपइटि॥दिदरिद्रिषति॥दिदरिद्रासति॥वेडिसे दीर्घताच्च॥दंभिज्ञप्योः

सेपरेवाइट्॥पक्षेअनयोःस्वरस्य इत्वं द्विरुक्तिलोपश्च इस इकारस्य दीर्घता॥दंभेर्वा
॥दंभ दंभे॥दंभितुमिच्छति॥दिदंभिषति॥जिज्ञापयिषति॥चुरादेशतोऽओपुकू॥
ज्ञीप्सति॥धिप्सति॥धीप्सति॥समाननामिसमिपाद्धासात्परः॥सोद्धसादिकित्वा
च्यः॥इतिसप्रक्रिया॥अथयङ्‌प्रक्रिया॥अतिशायेहसादेर्यङ्‌द्विश्च॥हसादेरेक
स्वराद्धातोरतिशायेर्थेयङ्‌प्रत्ययो भवति तस्मिन् सति धातोर्द्विवचनं॥यङि॥यङि
सतिलुकिचपूर्वस्य नामिनो गुणो भवति॥सधातुः॥बोभूः॥ङित्वादात्मनेपदं॥अव
श्यादे॥अतिशायेन भवति॥बोभूयते॥बोभूयेत॥बोभूयतां॥अबोभूयत॥बोभूयां
यि चक्रे॥बोभूयिषीष्ट॥बोभूता॥बोभूयिष्यते॥अबोभूयिष्यत॥अबोभूयिष्ट॥बोभू
ज्यते॥अनपिचहसात्॥हसादुत्तरस्ययङोलुग्भवति अनपिविषये॥धात्वंतो
लोपनिमित्ते आर्द्धधातुके परे तन्निमित्ते समाननामिनो गुणः॥द्विर्नवाच्यो॥बोभु

जाचक्रे॥ मुह वैचित्ये॥ मोमुह्यते॥ लिह आस्वादने॥ लेलिह्यते॥ दु दानादन
योः॥ जो दूयते॥ ये इति दीर्घः॥ विद ज्ञाने॥ वेविद्यते॥ आतः॥ यङि सति लुकि च पूर्व
का अकारस्य आ शे भवति अकिति॥ दापच्यते॥ अपापचिष्ट॥ पठ व्यक्तायां वाचि॥
पापठ्यते॥ स्वरादीनाम रादीनां यङ् वक्तव्यः॥ अट अश उर्णुञ् ऋ एते अरादय
यः॥ अट गतौ॥ स्वरादि परः॥ अटाट्यते॥ गत्यर्थात् कौटिल्ये एव यङ् वक्तव्यः॥ कौटि
ल्यमटमतीति॥ अश भोजने॥ अशाश्यते॥ ऊर्णुञ् आच्छादने॥ यङ् वर्णे विप्र ५०
घः॥ ऊरनु इति॥ ततः स्वरादेः परः॥ इति नु इत्यस्य द्वित्वं॥ यङि॥ यि दीर्घः॥ ऊर्णोनूयते इति
सिद्धं॥ अतिशयेन ऊर्णोति॥ ऊर्णोनूयते॥ वन्वदराः संयोगादयो द्वि न॥ गुणोर्ति संयोगा
द्योः॥ यकारे परे रेफस्य द्वित्वं वाच्यं॥ अरार्यते॥ अमनपोनुक्॥ अमान्तस्य जपादीनां च पू
र्वस्य द्वित्वे नुगागमो भवति यङि सति लुकि च॥ जपजमदहदंशभञ्जपशा एते जपा

दयः॥ जंगम्यते॥ बंभ्रम्यते॥ अउसेप्यनुस्वारः॥ आदेशिना आदेशो निर्दिश्यप
ते॥ यंयम्यते॥ कण शब्दे॥ चंकण्यते॥ तंतन्यते॥ जप माने॥ जपति॥ जंजप्यते॥
जभ मैथुने॥ जभ गात्रविनामे॥ जंभति॥ जंजभ्यते॥ दंदह्यते॥ नो लोपः॥ दंदश्य
ते॥ बंभज्यते॥ पंपश्यते॥ पशपति॥ पश बाधनग्रन्थयोः॥ चफलोरुच्चास्यां॥ अनयो ल
र्यङि लुकि सति पूर्वस्य नुगागमो भवति॥ अकारस्य उकारः॥ चुर गतिभक्षणयोः॥ चंचू
र्यते॥ फल निष्पत्तौ॥ पंफुल्यते॥ वलयोत्तस्य वा नुक्॥ वैमे स्थौल्ये॥ मंमव्यते॥ माम
व्यते॥ चल कंपने॥ चंचल्यते॥ चाचल्यते॥ दय दाने॥ दंदय्यते॥ दादय्यते॥ रीगृदु
पधस्य॥ ऋकारोपधस्य धातोर्यङि सति पूर्वस्य रीगागमो भवति रीकत्वादाकारा
भावः॥ नरीनृत्यते॥ अत्र गुणाभावो वाच्यः॥ वरीवृश्च्यते॥ परीपृच्छ्यते॥ जरीगृ
ह्यते॥ कृपेरो लः॥ ऋलृ॥ चरीक्लृप्यते॥ सृतौ विरीग्वा वाच्यः॥ वरीवृश्च्यते॥ परीपृच्छ्यते

ते॥वशेर्यङि न संप्रसारणं॥वावश्यते॥पदस्रस्रंसुध्वंसुभ्रंसुकसुके शावंचपत्स्कंदां
यङि लुकि च पूर्वस्य नीगागमो वाच्यः॥पनीपद्यते॥नोलोपः॥स्रंसुध्वंसुभ्रंसु
अधःपतने॥सनीस्रस्यते॥दनीध्वस्यते॥वनीभ्रश्यते॥दनीदह्यते॥चनी
कश्यते॥स्रंसति॥ध्वंसति॥भ्रंशति॥कश कशाने॥वंचु गतौ॥वनीवच्यते॥
पनीपत्यते॥चनीस्कद्यते॥ऋतोरिः॥ऋकारस्य रि आदेशो भवति यङि सति॥
ततो द्वित्वं॥चेक्रीयते॥डेढ्रीयते॥वेव्रीयते॥दादरिः॥अपि द्राघामाहे होकृपि
वतिसोऽस्थानामिकारो भवति किति ङिति च परे॥देद्रीयते॥देद्रीयां चक्रे॥देधीय ५२
ते॥मेमीयते॥जेगीयते॥जेहीयते॥पेपीयते॥सेषीयते॥तेष्ठीयते॥घ्राध्मोरी॥अन
योरीकारो भवति॥यङि सति॥जेघ्रीयते॥देध्मीयते॥हन्तेर्हिंसायां घ्नीवक्तव्यः॥
जेघ्नीयते॥जंघन्यते॥अभङ्गपान्नुक्॥द्विरुक्तस्य हन्तेः कुत्वं वाच्यं॥गत्यर्थेभ्यः कौटि

ल्ये यङ् वक्तव्यः॥वक्रं व्रजति॥वाव्रज्यते॥चायो यङि कीर्वाच्यः॥चाय संतानपालनयोः
चेकीयते॥कचतेर्यङि पूर्वस्य चुत्वाभावो वाच्यः॥कुङ् शब्दे॥कोकूयते॥शीङोऽयङ्किति
यो वाच्यः॥शाशय्यते॥इति यङ्प्रक्रिया॥अथ यङ्लुक्प्रक्रिया॥वान्यत्र लुगनुवर्त्तते
न्य' अत्र तु लुक्प्रत्ययसंयोगं विनापि यङो लुग्भवति लुकि सति सार्वधातुके पिति त्रिम्वेका
रो वक्तव्यः॥बोभवीति॥बोभोति॥बोभूतः॥बोभुवति॥बोभवांचकार॥बोभवामास॥
बोभवांबभूव॥बोभूयात्॥बोभविता॥बोभविष्यति॥अबोभविष्यत्॥गुणं बाधित्वा
नित्यत्वाद्वुक्॥अबोभवीत्॥अबोभोत्॥वुधातुर्विनावत्वं न भवति॥किंतु उवङ् भव
ति नुधातोरित्यनेन॥अबोभूतां॥अबोभूवुः॥अबोभूवीः॥अबोभोः॥अबोभूतं॥अ
बोभूत॥अबोभूवं॥अबोभूव॥अबोभूम॥अप्यादिदः॥भुवः सिलोपे स्वरे वुग्वक्तव्यः
यङ्लुङन्तपरस्मैपदं हलादि वर्जं द्वयं हलादिलादेशयोर्लुक्॥पापचीति॥पापक्ति॥पापक्तः

पापचति॥पापच्यात्॥पापक्तु॥पापचीतु॥ऊसाद्विर्हे॥पापगधि॥पापक्तात्॥अपापची
त्॥अपापक्॥द्विः स्वरे पिनोपधाया गुणः॥द्विरुक्तस्य धातोः पिति स्वरे परे अनपि विष
येउपधाया गुणो न भवति॥बोभुजीति॥बोभोक्ति॥बोभुक्तः॥वावदीति॥जाघटीति॥
जाघट्टि॥ऋकारांतानां मृदुपधानां च यङ्लुकि सति पूर्वस्य ऋ कृ रि कृ री कृ आगमा
वक्तव्याः॥रः॥चर्करीति॥चरिकरीति॥चरीकरीति॥चर्कर्ति॥चरिकर्ति॥चरीकर्ति॥
चर्कृतः॥चरिकृतः॥चरीकृतः॥चर्क्रति॥चरिक्रति॥चरीक्रति॥वर्वृतीति॥वरिवृ ५२
तीति॥वरीवृतीति॥वर्वर्ति॥वरिवर्ति॥वरीवर्ति॥राद्धस्य॥रेफादुत्तरस्य सस्यैव लो
पः स्यात्॥नान्यस्य॥अवर्वृतीत्॥अवर्वर्त्॥वर्वर्तांचकार॥वरिवर्तांचकार॥वनीवंचीति
वनीवंक्ति॥वनीवक्तः॥वनीवचति॥जंगमीति॥जंगंति॥जंगतः॥गमां स्वरे॥जंग्मति॥
धातुग्रहणात् यङ्लुकि वेति केचित्॥चचीत्॥जंगमति॥वौस्था॥धातोर्मकारस्य न

क्षीरलवणयोः कृ आयंयः सुक्॥क्षीरस्यति॥लवणस्यति॥शब्दादिभ्यो यङ् करणे
र्थे वाच्यः॥शब्दायते॥वैरायते॥कलहायते॥अभ्रायते॥मेघायते॥उष्मवाष्पा
भ्यामुद्वमने यङ् वाच्यः॥उष्माणमुद्वमति॥उष्मायते॥वाष्पायते॥णिर्तुत्करणे॥नाम्नो
करणेर्थे णिप्रत्ययो भवति॥स च ड्रित्॥टिलोपः॥अकारउभयपार्श्वयोः॥घटं करोति
घटयति॥अग्लोपिनो नाङ् कथं॥अजघटत्॥महांतं करोति॥महयति॥पृथ्वादेरः
॥पृथ्वादेर्गणस्य ऋकारस्य रो भवति णौ परे॥प्रथयति॥म्रदयति॥द्रढयति॥दृढं
करोति॥ऊढयति॥औ॥और ङ्ढिस्था॥ओः॥स्वरादेः परः॥अङि पूर्वस्य ढस्य ङः॥अ
टो॥वहू ढेत तो ढेत संप्रसारि हो ढस्त्त्योर्धः हुभिनाढिढस्था॥ऊढो च णि ङित्करणे
स धातुर्औरह स्वरादेर्ढस्त ओजढच्च॥ओजढत्॥औडिढत्॥औडढत्॥कर्तुर्यङ्
॥कर्तुरुपमानादाचारेर्थे यङ् प्रत्ययो भवति॥श्येन इवाचरति॥श्येनायते॥काकः॥

कारोभवतिवमयोःपरतः॥जंगन्मि॥जंगन्वः॥जंगन्मः॥जंघनीति॥जंघेति॥जंघंतः॥
जंघ्नति॥जाहेति॥ऋ जहाति॥ङ्क्स्वः आतः॥जाहीनः जाहेति॥एवंदादेति॥इत्यादि॥
जहातेपूर्वस्यदीर्घोभवतिवेतिकेचित्॥ जहाति॥ इतियङ्लुक्प्रक्रिया॥अथनाम
धातुप्रक्रिया॥नाम्नोयङ्चास्य॥नाम्नोइच्छायामर्थेयप्रत्ययोभवतितत्संनीयोगे
चाकारस्यईकारः॥आत्मनःपुत्रमिच्छति॥पुत्रीयति॥पुत्रीयेत्॥पुत्रीयतु॥अपुत्री ५३
यत्॥यादौप्रत्ययेपरेओकारौकारयोरवावूववक्रेण्यौ॥गांइच्छति॥गव्यति॥नावंइच्छ
ति॥नाव्यति॥व्यति॥मह्यति॥गव्यांचकार॥आयादयोनपिवावक्रेण्यां॥गवांचका
र॥नाव्यांचकार॥नाव्यात्॥नाविता॥नाव्यिता॥अगावीत्॥अगावीत्॥अगव्यिष्टां॥अ
गविष्टां॥अगव्यिषुः॥अगविषुः॥अनावीत्॥अनाव्यीत्॥अनाविष्टां॥अनाव्यिषुः॥क
रणेच॥नाम्नःकरणेर्थेयप्रत्ययोभवति॥कंडुकरोति॥कंडुयति॥नमस्यति॥तपस्यति॥

पंडितायते॥यङि सलोपोवाच्यः॥पयसस्तुविभाषया॥अप्सरायते॥ओजायते॥पयाय
ते॥पयस्यते॥सुमनायते॥नाम्नआचारेक्विप्वाच्यः॥कृष्णइवआचरति॥कृष्णति॥
क्विलोपोयः॥स्वति॥स्वांचकार॥आचारउपमानात्॥कर्मधारयोरुपमानात्यप्र
त्ययोभवतिआचारेर्थेअकारस्यइकारः॥पुत्रीयति॥शिष्यमुपाध्यायः॥प्रासादीय
ति॥कुट्यां॥भृशादिभ्योभूततद्भावेयङ्वाच्यः॥अभृशोभृशोभवति॥भृशायते॥श
मायते॥इत्यादि॥अश्वहषयोर्मैथुनेच्छायांयप्रत्ययःसुगागमश्च॥अश्वस्यतिहषस्य
ति॥सुखादिभ्योज्ञापनायांयङ्॥सुखंज्ञापयति॥सुखायते॥इतिनामधातुप्रक्रिया॥
अथात्मनेपदव्यवस्था॥निविशादेः॥नीत्याद्युपसर्गपूर्वकाद्विशादेर्धातोरात्मनेपदंभ
वति॥निविशते॥विपराभ्यांजेः॥विजयते॥पराजयते॥समोगमादिभ्यः॥संगच्छते॥गमः
परेसिस्योरात्मनेपदेवाकितौवाच्यौ॥लोपस्त्वनुदात्ततनां॥संगंसीष्ट॥संगंसीष्ट॥लो

पोरुस्वात्॥ समगत॥ समगंस्त॥ रुछिगतींद्रियप्रलयमूर्त्तिभाविषु॥ समृछते॥ नुगश्णा॥
रुछेर्लिंरिगुणः॥ आनर्छ॥ समानर्छे॥ संरछते॥ स्वृशब्दोपतापयोः॥ संस्वरते॥
स्वृस्वतिसूयतीतिवेट संस्वृषीष्ट॥ संस्वरिषीष्ट॥ समियृत॥ समीरि॥ संस्पृणुते॥
संविन्ते॥ संविद्राते॥ वेत्तेर्तोवा रुट्॥ संविद्रते॥ संविदते॥ संपश्यते॥ [illegible]मरुछपछ
स्वृरुश्रुविद्दृशाणतेगमादयः॥ आङोदोनास्यविहरणे॥ आङ्पूर्वाद्ददातेरा
त्मनेपदं भवति मुखप्रसारणे व्यतिरिक्तेर्थे॥ आदत्ते॥ मुखंव्याददाति॥ अत्रन
॥ क्रीडोनुसंपरिभ्यश्च॥ अनुसंपरिभ्यः क्रीडतेरात्मनेपदं भवति॥ क्रीडविहारेश ५५
दैच॥ अनुक्रीडते॥ संक्रीडते॥ परिक्रीडते॥ शब्देतुन॥ संक्रीडतिरथचक्रं॥ समव
प्रोपविभ्यःस्थः॥ एभ्यः तिष्ठतेरात्मनेपदं भवति॥ संतिष्ठते॥ अवतिष्ठते॥ प्रतिष्ठते॥ उपति

ष्ठते॥ वितिष्ठते॥ उदोनूर्ध्वकर्मणि॥ उदः अनूर्ध्वकर्मणि तिष्ठतेरात्मनेपदं भवति मुक्ता
वुत्तिष्ठते॥ उदस्थावेसलोपश्च॥ अनूर्ध्वकर्मणि किं पीठादुत्तिष्ठति॥ आङोयमहनः॥
आङ्पूर्वयोर्यमहनोरात्मनेपदं भवति॥ आयछते॥ आहते॥ अकर्मकयोरात्मांग
कर्मकयोर्वा॥ आयछते पाणिं॥ आहते शिरः॥ अन्यथा परशिरः॥ आयछति॥ [illegible]॥ रा
ज्ञुमाहंति॥ हंतेपरःसिकित्स्वक्तव्यः॥ नोलोपः॥ आहतावधाद्दृशाः॥ आतिवा॥ आव
धिष्ट॥ उद्विभ्यांतपः॥ उद्विभ्यां परस्याकर्मकस्यात्मांगकर्मकस्य वा तपतेरात्मनेपदं भ
वति॥ वितपतेपाणिं॥ अन्यथावितपत्यर्कः॥ उदश्चरस्याङे॥ उत्पूर्वाच्चरतेस्याङेर्थे
आत्मनेपदं भवति॥ धर्ममुच्चरते त्यजतीत्यर्थः॥ त्याङेकिं मंत्रमुच्चरति॥ समस्तेनसंचरते
॥ व्यवपरिभ्यः क्रीञः॥ एभ्यः क्रीणातेरात्मनेपदं भवति॥ विक्रीणीते॥ अवक्रीणीते॥ परि
क्रीणीते॥ परिचक्रिये॥ शपउपालंभे॥ उपालंभेर्थे शपतेरात्मनेपदं भवति॥ वा॰

शरीरस्पर्शनं उपालंभः॥ विप्राय शप... ...वा शरीरं स्पर्शमानः शपथं करोतीत्यर्थः॥
उपालंभे किं? दुष्टं शपति॥ शापं ददातीत्यर्थः॥ ज्ञाश्रुस्मृदृशां सन्नंतानामात्॥ सन्प्रत्ययांता
नामेषामात्मनेपदं भवति॥ यः सो॥ जिज्ञासते॥ शुश्रूषते॥ सुस्मूर्षते॥ दिदृक्षते॥ अनुपस
र्गाज्ज्ञो नाते॥ आत्मगामिनी फले आत्मनेपदं वा च्य॥ गां अनुजानीते॥ कर्मव्यतिहारे अ
न्यत्र हिंसादेरात्॥ कर्मव्यतिहारेर्थे वाच्ये हिंसार्थात् गत्यर्थात् नृपठजल्पहसा न विहा
य इतरेतरान्योन्यपरस्परोपपदाभावे सर्वेभ्यो धातुभ्य आत्मनेपदं भवति परस्प पा
रमेकक्रियाकरणं कर्मव्यतिहारः॥ अस्य व्यतिभवति व्यतिस्ते॥ विवदंते वादिनः॥ अन्य ५५
चेति किं? शाब्दवः व्यतिघ्नंति॥ व्यतिगच्छंति॥ व्यतिपठंति॥ विप्रा व्यतिजल्पंति मद्यपाः॥ व्यति
हसंति॥ इतरेतरं परस्परं॥ अन्योन्यं वा॥ व्यतिलुनंति॥ भुजोऽभोजने॥ आत्मनेपदं वाच्यं
भुंक्ते उदनं॥ भुनक्ति महीं नृपः॥ इति आत्मनेपदव्यवस्था॥ अथ भावकर्मणोर्यक्

प्रक्रिया॥ यक् चतुर्षु॥ धातोर्भावे कर्मणि च यक्प्रत्ययो भवति चतुर्षु पूर्वोक्तेषु परतः॥
कोऽनुबंधः॥ आदन्तु विकर्मणि॥ अकर्मकेभ्यो धातुभ्यो भुवि भावे सकर्मकेभ्यश्च कर्म
ण्यात्मनेपदं भवति॥ अकर्मनिर्येषां क्रिया मा कुत्ते अकर्मकाः॥ भूएध आस शी उ प्रभृ
तयः॥ तदुक्तं॥ लज्जासत्तास्थितिजागरणं वृद्धिक्षयभयजीवितमरणं॥ शयनक्री
क डारुचिदीप्त्यर्थं धातुगणं तमकर्मकमाहुः॥ भावस्यैकत्वादेकवचनमेव भवति प्र
थमपुरुषस्य भूयते भवता॥ भूयेत॥ भूयतां॥ अभूयत॥ बभूवे॥ स्वरांतानां हनग्र
हदृशां च भावकर्मणोः सिसतासीस्य पाणिदिट् वा वक्तव्यः॥ णित्वात् वृद्धिः॥ भावि
षीष्ट॥ णित्वाभावे॥ भाविषीष्ट॥ भाविता॥ भविता॥ भाविष्यते॥ भविष्यते॥ अभाविष्यत॥
अभविष्यत॥ इणातन्यकर्त्तरि॥ धातोस्तनि परे भावे कर्मणि च इण्प्रत्ययो भवति से रूप वा
दः॥ णो वृद्ध्यर्थः॥ लोपः॥ इण्संयोगे तनो लोपो भवति॥ अभावि॥ अकर्मकोपि कदाचि
द्ध

तू सकर्मतामनुभवति ॥ उक्तं च ॥ अथ उपसर्गे ॥ धात्वर्थो बलादन्यत्र नीयते ॥ विहाराहा
प्रति रसंहारप्रहारवत् ॥ १ ॥ धात्वर्थं वाध्यते कश्चित् कश्चित्तमनुवर्त्तते ॥ विशिनष्टि त
हार मेवार्थमुपसर्गगतिस्त्रिधा ॥ सुखमनुभूयते स्वामिना ॥ २ ॥ अन्वभावि ॥ अन्वभा
विषातां ॥ अन्वभाविषत ॥ अन्वभाविषातां ॥ अन्वभाविषत ॥ शीङः इ यङ्क्ङिति ङि
तियेव क्तव्यः ॥ शय्यते शिश्ये ॥ शायिषीष्ट ॥ अन्वशायि ॥ अन्वशायिषातां ॥ अ
न्वशायिषत ॥ अन्वशायिषातां ॥ अन्वशायिषत ॥ ये कर्मसापेक्षाः क्रियामादुस्ते स ५६
कर्मकाः ॥ अयकि ॥ घटः क्रियते ॥ त्वं दुःखी क्रियते क्रियसे रागैर्विरागैः सुखमहं क्रिये
चक्रे ॥ कारिषीष्ट ॥ कृषीष्ट ॥ उः कारिता ॥ कर्त्ता ॥ हन्तृस्यपः ॥ कारिष्यते ॥ करिष्यते ॥ अ
कारि ॥ अकारिषातां ॥ अकृषातां ॥ अकारिषत ॥ अकृषत ॥ चिञ् चयने ॥ चीयते ॥
चिच्ये ॥ चायिषीष्ट ॥ चेषीष्ट ॥ चायिता ॥ चेता ॥ चायिष्यते ॥ चेष्यते ॥ अचायिष्यत ॥

अचेष्यत ॥ अचायिषातां ॥ अचेषातां ॥ दाददिरिः ॥ दीयते ॥ ददे ॥ ददाते ॥ आतो युक् ॥ आ
कारान्ताद्धातोर्युगागमो भवति ञिति णिति परे ॥ दायिषीष्ट ॥ दासीष्ट ॥ दायिता ॥ दाता
दायिष्यते ॥ दास्यते ॥ अदायिष्यत ॥ अदास्यत ॥ अदायि ॥ अदायिषातां ॥ दाधास्था
मित्वं ॥ अदिषातां ॥ धीयते ॥ अधायि ॥ अधायिषातां ॥ अधिषातां स्थीयते ॥ अस्था
यिषातां ॥ अस्थिषातां ॥ स्तूयते ॥ तुष्टुवे ॥ अस्तावि ॥ अस्ताविषातां ॥ अस्तोषातां ॥ हरिर्ह
रीभक्तेन हन्यते ॥ द्विरुक्तस्य हन्तेः कुत्वं वाच्यं ॥ जघ्ने ॥ घानिषीष्ट ॥ हसीष्ट ॥ घानिता ॥ ह
न्ता ॥ घानिष्यते ॥ हनिष्यते ॥ अघाष्यत ॥ अघानि ॥ अघानिषातां ॥ हन आत्मने पदे सिचि
त्वक्तव्यः ॥ लोपस्त्वनुदात्तानां ॥ अहसातां ॥ अहसत ॥ हन्तेर्वधादेशः ॥ आतिवा ॥ अवधि
अवधिषातां ॥ ग्रहो ङ्किति च ॥ गृह्यते ॥ जगृहे ॥ ग्राहीषीष्ट ॥ इटो ग्रहः ॥ ग्रहीषीष्ट ॥ ग्राहिता ॥
ग्रहिता ॥ ग्राहिष्यते ॥ ग्रहीष्यते ॥ अग्राहिष्यत ॥ अग्रहिष्यत ॥ अग्राहि ॥ अग्रहिषातां अग्रही
ग्रा

षातां॥ दर्शयते॥ ददृशे॥ दर्शिषीष्ट॥ दृक्षीष्ट॥ दर्शिता॥ द्रष्टा॥ दर्शिष्यते॥ द्रक्ष्यते॥ अदर्शि॥
अदर्शिषातां॥ अदृक्षातां॥ डुपचष् पाके॥ पच्यते॥ पेचे॥ पक्षीष्ट॥ पक्ता॥ पक्ष्यते॥ अपक्ष्यत॥
अपाचि॥ अपक्षातां॥ तनो नावा॥ तनोतेर्नकारस्याकारो भवति यकि च परे॥ तायते॥ तन्यते॥
तेने॥ अतानि॥ अतनिषातां॥ जं जनजोऽआमदंते॥ नोलोपः॥ जन्यते॥ अकित्वोत्वे जेडे॥ जंसीष्ट॥ जंता
॥ जंस्यते॥ जंडेशिणिवा नलोपो वा वः॥ अजंनि॥ अजाडि॥ शमू उपशमे॥ शम्यते॥ मुनिना
घातो वृरणेमितां हृस्वः॥ मे॥ शम्यते मोहो हरिणा॥ शमयां चक्रे॥ ण्यन्तानां मितां णौ मितिं दि
टि च वा दीर्घो वाच्यः॥ णि टि टि भिलोपश्च॥ अशमि॥ अशामि॥ अशामिषातां॥ णि हि भावे पक्षे
अशमयिषातां॥ गुणेर्नसंयोगाद्योः॥ अर्थ्यते॥ समर्थ्यते॥ यत्र कर्म गुणसंयोगात् कर्तृत्वेन विवक्ष्य
ते स कर्मकर्त्ता॥ न दुहस्नु॥ क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति॥ सुकरैः स्वैर्गुणैर्यस्मात्कर्म ५७
कर्त्तेति तद्विदुः॥१॥ तत्राप्येतद्विदो दाहरणं॥ लूयते केदारः स्वयमेव॥ लुलुवे॥ अलावि॥ अलावि
षातां॥ अलविषातां॥ पच्यते ओदनः स्वयमेव॥ भिदिर् विदारणे॥ भिद्यते काष्ठं स्वयमेव॥ अभे
दि॥ दुहस्नुनमां कर्मकर्त्तरि यगिणौ न॥ दुग्धे स्नुते गौः स्वयमेव॥ नमते दंडः स्वयमेव॥ अच

कर्मकर्त्तरि॥ अडं लात् रिणवा॥ स्यात्कर्मकर्तरि तनिशदेः अकारि॥ अतत॥ दुहस्नतथा॥ अ
दोहि॥ अदुग्ध॥ अस्नोष्ट॥ स्नु वा कर्मोर नात्मनेपदं निमित्तं यद्वात्मनेपदनिमित्तं नास्ति तत्रस्नु
कर्मोऽरिष्ट स्यात्॥ अस्नाविष्ट॥ अनंस्त॥ अथ द्विकर्मका॥ दुह्याच्यचरुधिप्रछिचिब्रुशासद्विक
र्मयुक्॥ णीङ् स्वराः तात् कर्मके कर्त्तरि णिवा तत्सि॥ कृष्मंथवहं दंड्रुधि ग्रहमुषपचेमकर्मकाः॥१॥ न्या
दयोऽप्येतन्नि कर्मगत्यर्थी मुख्यकर्मणि णत्त्यंयंद्याति दुह्यादि गौणे अन्ये तु तथा रुचि॥ निन्ये विज्ञनम
ज्ञागरिरजनी मगामिमरदमध्या चिसंज्ञो गं॥ गौ पीड्यसमकार्यं तन्नाव श्चेनामनंतेना॥२॥ कर्त्तुरिष्ट
तमं प्रधानकर्म॥ अन्यदन्यप्रधानं कर्म॥ नगरं नीयते नागरिकैर्वनेचरः॥ नोऽजनया च्युते यज्ञ
मानो याचकेन॥ एष्यते पंथा नेपथिकेन पांथः॥ शिष्यणाचार्यं स्तत्त्व इष्यते॥ चिकीर्ष्यते देव
दत्तेन वा ऊर्ध्यते॥ अनपि च ह सात्॥ पापच्यते॥ तेन पापचितं॥ अपापचि॥ इत्यादि॥ इति भाव
कर्मप्रक्रिया॥ हृठयो नः पुन्यायोर्लोण्मध्यमपुरुषैकवचनांत तानिपात्यते॥ परीभव स्कंदस्तु

नाह्निनंदनं मुष्णाण रत्नानि हरामरोगनाः॥ विग्रस्य चक्रेन मुचिद्विषावशीय इत्यस्य मस्वा
स्थ्यमम मह्ननिं संदिग्धः॥२॥ वर्त्तमानाया अपि विवक्षितैः स्म योगे भूतार्थतावक्तव्याः॥ आस्म
स्मरितः॥ यज्ञस्म युधिष्ठिरः॥ विवक्षितायां पक्षयोः स्वल्पकाले पि णवादिर्वाच्याः॥ सुप्तोऽहं कि
लविललाप॥ नाहं कलिंगं जगाम॥ यावत्पुरानिपातयोर्योगे भविष्यदर्थे लट् पुराक
रोति॥ करिष्यतीत्यर्थः॥ स्मृत्यर्थधातुयोगे भूतेर्थे लृट्॥ स्मरसि मित्र यद्दुपकरि ५८
ष्यसि॥ उपाकुरुथ इत्यर्थः॥ इति लकारार्थाः॥ धातुनामप्यनंतत्वात् नना र्थत्वाच्च
सर्वथा अभिधातुमशक्यत्वाद्दारव्यातप्रख्यापनैरलं॥ इति श्रीअनुभूतिस्वरूपा
चार्यविरचितायां सारस्वती प्रक्रिया संपूर्णं॥ ॥ श्रीकृष्णायनमः॥ ॥ श्री॥ ॥